कामकलाविलासः

Tantra
T

HARI

45776

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
काश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुल्लसदायिनम् ॥ २ ॥

SANSKRIT

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२

कामकलाविलासः

श्रीमत्पुण्यानन्दाचार्यविरचितः

सटीकः

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्तारपत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ काश्मीर-श्रीनगर ख्रीस्ताब्दः १९१८

अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

SANSKRIT

ओं नमः शिवाय क्रमाक्रमात्मसंविन्मूर्तये ।

अथ

कामकलाविलासः

श्रीमत्पुण्यानन्दाचार्यविरचितः ।

क्रमत्रयसमाश्रयव्यतिकरेण या संततं
क्रमत्रितयलङ्घनं विदधती विभात्युच्चकैः ।
क्रमैकवपु क्रमप्रकृतिरेव या द्योतते
करोमि हृदि तामहं भगवतीं परां संविदम् ॥

सकलभुवनोदयस्थिति-
लयमयलीलाविनोदनोद्युक्तः ।
अन्तर्लीनविमर्शः
पातु महेशः प्रकाशमात्रतनुः ॥ १ ॥

अत्र पुण्यानन्दयोगिनः सकलविद्याधिदैवतभूतात्रिपुर-
सुन्दरीमन्त्रचक्रव्याचिकीर्षिततया तदधिष्ठानभूतकामकामेश्व-

रीरूपां आद्यां आचक्षते। सकलेत्यादि, सकलानां भुवनानाम् उदयः सर्गः, स्थितिः रक्षा, लयो नाशः, एतत् त्रितयं निरोधानुग्रहयोरुपलक्षणम्, एतत्पञ्चविधकृत्यप्रचुरा या लीला तया विनोदनं क्रीडनं तस्मिन् उद्युक्तो जागरूकः, प्रयद् अत्र प्राचुर्यार्थे विहितः। एवं च सति जगद्व्यतिरिक्तलक्षणं ब्रह्मस्वरूपं कीदृशम्? इत्याकाङ्क्षायाम् आह—अन्तर्लीनविमर्श इत्यादिना, विमृश्यते परामृश्यते इदमिति विमर्शः प्रपञ्चः, इद मित्येवं परमात्मना सृष्टस्य जगतः प्रसिद्धः परामर्शः, एवंभूतो यो विमर्शः प्रपञ्चः अन्तर्लीनोऽन्तर्गतो यस्य स अन्तर्लीनविमर्शः। तदयमत्रार्थः—स्वात्मसात्कृताखिलप्रपञ्चः परिपूर्णाहंभावभावनागर्भितः, अथ वा जगदुत्पत्तिस्थितिलयहेतुभूताकृत्रिमाहमिति परामर्शो विमर्शः। तथा च नागानन्दाः

> 'विमर्शो नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहारेण वा अकृत्रिमाहमिति विश्वस्फुरणम्,
> तस्य अन्तर्लीनत्वं नाम अन्तर्मुखत्वम्।'

तथा च अयमर्थः—अन्तर्लीनः अन्तर्मुखो विमर्शः पूर्णाहंभावो यस्य इति, तस्य परब्रह्मणः परमेश्वरस्य प्रकाशकस्वभावत्वं सर्वोत्परत्वं च आह—प्रकाशमात्रतनुः इति, अत्र प्रकाशत्वं नाम—इच्छामि जानामि करोमि इति उत्तमपुरुषा-

न्तर्गतस्फुरणरूपाहंपरामर्श एव। ननु सूर्यादीनामपि प्रकाशत्वं दृष्टं तत्कथम् अस्यैव परमात्मत्वम्? अत आह—महेश इति, महांश्चासौ ईश इति महेशः, महत्त्वं च देशकालाकारैरनवच्छिन्नस्वरूपत्वात्, ईशत्वं सर्वनियन्तृत्वात् इति ॥ १ ॥

पराभट्टारिकायामपि सर्वाकारत्वमाह

सा जयति शक्तिराद्या
निजसुखमयनित्यनिरुपमाकारा।
भाविचराचरबीजं
शिवरूपविमर्शनिर्मलादर्शः ॥ २ ॥

सा आद्या शक्तिः अनवच्छिन्ना पराभट्टारिका महात्रिपुरसुन्दरी, जयति सर्वोत्कर्षेण वर्तते, सा इति शिवादि-क्षित्यन्तषट्त्रिंशत्तत्त्वमयी सर्वप्रपञ्चात्मिका तदुत्तीर्णा च, इति—सर्वोपनिषत्प्रसिद्धा त्रिपुरा अभिधीयते, त्रिभ्यस्तेजोभ्यः पुरा भूता त्रिपुरा इति निगद्यते, तस्याश्च सर्वोत्कृष्टत्वं सर्वत्र आगमेषु उद्घोष्यते। एतदेव विवृणोति—निजेत्यादिना, निजः स्वाभाविकः सुखमयः दुःखसंभिन्नो नित्यः सार्वकालिकः निरुपमो निरवधिक आकारः स्वरूपं यस्याः। भाविचरा-

चरबीजं—भाविनोः संपत्स्यमानयोः चराचरयोः स्थावर-जङ्गमयोर्बीजं योनिः कारणमित्यर्थः। ननु शिवस्य यथा जगन्निर्मातृत्वं शक्त्या विना न संगच्छते, एवं पराशक्तेरपि परमशिवेन विना कारणत्वं न भवेत् इति, तत्कथमुच्यते भाविचराचरबीजम् इति? अत आह—शिवरूपविमर्शनिर्मलादर्श इति, शिवस्य स्वरूपम् अहमित्येवमाकारं तस्य विमर्शः परामर्शनम् अहमित्येवं-रूपं ज्ञानं तस्य प्रकाशने निर्मलादर्शः सम्यक्प्रका[illegible]नचतुर इत्यर्थः। यथा कश्चित् राजा अतिसुन्दरः स्वात्माभिमुखस्थितस्वच्छादर्शतले स्वात्मप्रतिबिम्बं सम्यक् प्रसमीक्ष्य तत्प्रतिबिम्बम् अहमिति जानाति, एवं परमेश्वरोऽपि स्वाधीनभूतां स्वात्मशक्तिं सम्यक् अवलोक्य स्वस्वरूपम् अवगच्छति ॥ २ ॥

परिपूर्णोऽहम् इति विमर्शमेव ब्रह्म वदन्ति केचन तत्कथमुच्यते—सविमर्शकं ब्रह्म? इत्यत आह

स्फुटशिवशक्तिसमागम-
बीजाङ्कुररूपिणी पराशक्तिः।
अणुतररूपानुत्तर-
विमर्शलिपिलक्ष्यविग्रहा भाति ॥ ३॥

अत्र पराशब्देन प्रकृता ख्याता महात्रिपुरसुन्दरी अभिधीयते—चिदानन्देच्छाज्ञानक्रियारूपा, इति [illegible]सिद्धितया एवमुच्यते-स्फुटशिवशक्तिसमागमबीजाङ्कुररूपिणीति, शिवश्च शक्तिश्च शिवशक्ती तयोः [illegible]आगमः संयोगः स्फुटः व्यक्तः शिवशक्तिसमागमोऽयं, तेन बीजाङ्कुररूपिणीति, बीजादङ्कुरं अङ्कुराद्बीजम् इतिवत् शिवतत्त्वादि-क्षितितत्त्वपर्यन्तं तत्त्वजालम् उत्तरोत्तरम् उद्भावयेत् इत्यर्थः, अत्र शिवशब्देनापि शक्तिरभिधीयते ज्ञानशक्त्यधिष्ठानत्वात् शिवतत्त्वस्य, शक्तिशब्देनापि क्रियाशक्तिरभिधीयते क्रियाशक्त्यधिष्ठानत्वाद् शक्तितत्त्वस्य—चिदानन्दस्वरूपिण्याः सर्वत्र ज्ञानक्रियाभ्यामेव निर्माणौचित्यदर्शनात्। पुनस्तामेव विशिनष्टि—'अणुतररूपानुत्तरविमर्शलिपिलक्ष्यविग्रहा भाति'—अणुतरम् अत्यन्तसूक्ष्मरूपम् अस्या इति—अनुत्तरलिपिः अकारः विमर्शलिपिः हकारः ताभ्यां लक्ष्यं विग्रहं स्वरूपं यस्याः तथोक्ता। अत्र अनुत्तरविमर्शलिपिलक्ष्यविग्रहा इत्यनेन अहमात्मिकान्तर्गर्भितसमस्तवर्णकदम्बका पराशक्तिः अकारादि-हकारान्तं पञ्चाशदक्षररूपिणी वर्ण-पद-मन्त्र-कला-तत्त्व-भुवनात्मकसमस्तप्रपञ्चजनयित्री पराभट्टारिका समस्तभूतान्तरात्मा सर्वत्र वेदान्ते 'अहमहम्' इत्येवमाकारेण प्रतीयमाना दृश्यते इत्युक्तं भवति ॥ ३ ॥

इतः परं प्रबन्धेन ...नप्रतिपाद्यां कामकलाक्षररूपिणी-मेव कामः शिवः तदक्षररूपां वक्तुमुपक्रमते, – 'परशिवरविकर इत्यादि, कला च दहनेन्दुविग्रहो बिन्दुः' इत्यन्तम्

परशिवरविकरनिकरे
प्रतिफलति विमर्शदर्पणे विशदे ।
प्रतिरुचिरुचिरे कुड्ये
चित्तमये निविशते महाबिन्दुः ॥ ४ ॥

परशिवः प्रकाशैकस्वभावः परमशिवभट्टारक एव रवि-र्दिनकरः तस्य कराः किरणाः तेषां निकरः पुञ्जः, तस्मिन् विशदे निर्मले विमर्शदर्पणे, विमर्शो नाम अनवधिकका विस्फुरणशक्तिः, तथा प्रत्यभिज्ञायाम्

'सा स्फुरत्ता.................................. ।'

इत्यादिनैव दर्पणत्वेन निरूप्यते – स्वस्वरूपप्रकाशत्वात् । तत्र प्रतिफलनं नाम स्वरूपावलोकनं, तादृशप्रतिफलनरूपाव-लोकने सति, चित्तमये – ज्ञानैकस्वरूपे, प्रतिरुचिरुचिरे – प्रति-प्रकाशमनोहरे, कुड्ये, महाबिन्दुः निविशते प्रतिष्ठितो भवति । चित्तस्य कुड्यत्वनिरूपणं महाबिन्द्वाविर्भावकारणत्वात्,

लोकेऽपि सूर्याभिमुखस्थितदर्पणतले सूर्यकिरणप्रतिफलना-नन्तरं निकटगतकुड्ये सूर्यकिरणप्रतिहततेजोबिन्दुः प्रत्यक्षं प्रपद्यते, तद्वत् प्रकाशरूपपरमेश्वरस्य दर्पणवत् स्वरूपविमर्श-संबन्धे जाते तदानीं तत्र महाबिन्दुः 'पूर्णोऽहम्' इत्येवं-रूपः परमेश्वरोऽवभासते इत्यर्थः । आगमश्च

'स्फुरत्तामात्मनः पश्येत्तदा चक्रस्य संभवः ।'

इति । प्रत्यभिज्ञायामपि

'सा स्फुरत्ता महासत्ता........................ ।'

इत्यादि । परमानन्दयोगिनोऽपि

'ईदृगियत्तादिवचो दूरतरं स्वानुभूतिसंवेद्यम् ।
तत्तादृशस्फुरत्ताशेषा संवित्कथं नु सा वाच्या ॥'

इत्यादि ॥ ४ ॥

तादृगुज्ज्वलात्मशक्त्यवलोकनोद्भूताहम्भावमेव विशिनष्टि

चित्तमयोऽहंकारः
सुव्यक्ताहार्णसमरसाकारः ।
शिवशक्तिमिथुनपिण्डः
कवलीकृतभुवनमण्डलो जयति ॥ ५ ॥

'अहंकार इति' उद्भूतान्यस्मरणानुभवव्यञ्जको योऽयम् अहमहमित्येव विमर्शः तस्य कारः कारणम्, एवं-भूतोऽहंकारो जयति सर्वोत्कर्षेण वर्तते । यतः

'प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः ।'

चित्तमयः ज्ञानैकस्वभावः सुव्यक्ताहार्णसमरसाकारः, अश्च हश्च इत्यहौ सुतरां व्यक्तौ स्पष्टौ परस्परोद्भूतरूपौ सुव्यक्ताहौ एव लोलीभवतो यत्र सः शिवशक्तिमिथुनपिण्डः, अत एव कवलीकृतभुवनमण्डलः, अन्तःस्थापितं भुवनमण्डलं षट्त्रिंशत्तत्त्वसंघातमयं येन सः । अयमर्थः – मत्स्याहारन्यायेन अन्तर्गर्भितसमस्तवर्णकदम्बकाहंकाररूपप्रकाशविमर्शसंपुटादेव शब्दार्थात्मकसर्वप्रपञ्चविकासो भवति । तथा च श्रुतिः

'एको वर्णो बहुधा शक्तियोगाद्-
वर्णाननेकान्निहितार्थो दधाति ।'

इति ॥ ५ ॥

इतः परं 'चित्तमये निविशते महाबिन्दुः' इति यदुक्तम् तत्र बिन्दुस्वरूपनिरूपणद्वारा कामकलाम् उपदिशति

सितशोणबिन्दुयुगलं
विविक्तशिवशक्तिसंकुचत्प्रसरम् ।

वागर्थसृष्टिहेतुः
परस्परानुप्रविष्टविस्पष्टम् ॥ ६ ॥

बिन्दुरहंकारात्मा
रविरेतन्मिथुनसमरसाकारः ।
कामः कमनीयतया
कला च दहनेन्दुविग्रहौ बिन्दू ॥ ७ ॥

सितः शुभ्रः, शोणो रक्तः, तद्रूपौ बिन्दू, तयोर्युगलम्, अत एव विविक्तशिवशक्ति – अन्योन्यविहरणपरे शिवशक्ती यस्मिन् कर्मणि तत्, अत एव संकुचत्प्रसरं – संकुचन् मुकुलीभवन् प्रसरः जगत्सृष्टिरूपो यस्मिन् तत्, वाचः – परा-पश्यन्त्यादिरूपसमस्तशब्दाः, अर्थाः – शिवादि-क्षित्यन्तषट्त्रिंशत्तत्त्वरूपाः, तेषां सृष्टिः षडध्वात्मकजगन्निर्मितिः, तत्र हेतुः कारणम् । परस्परानुप्रविष्टविस्पष्टम् – परस्परम् अन्योन्यम् अनुप्रविष्टम् अन्तर्गतं विस्पष्टं पृथग्भूतं च तत्, एवं-भूतं सितशोणबिन्दुयुगलं – कामकामेश्वरीरूपं दिव्यमिथुनं, विभावयेत् इति पूर्वेण संबन्धः । अत्र इदमतिरहस्यम् ।

'यः परः स महेश्वरः ।'

इति श्रुत्युक्तरीत्या निखिलवेदादिशब्दोत्पादकानुत्तराभिधेयः

परमेश्वरः स्वाङ्गभूताखिलप्रपञ्चविलयात्मकविमर्शशक्तिम् अनुप्रविश्य बिन्दुभावं मन्यते, ततः सा विमर्शशक्तिरपि स्वान्तर्गतप्रकाशमयबिन्दुम् अनुप्रविशति, ततश्च बिन्दुरुत्पन्नो भवति, तस्माद्बिन्दोः नादात्मिका समस्ततत्त्वगर्भिणी तेजोमयी जीवरूपा बालाग्रवत् सूक्ष्मरूपिणी इति गत्या शृङ्गाटकरूपताम् उद्गृह्णाति । एवं च बिन्दुनादस्वरूपयोस्तयोः प्रकाशविमर्शयोरहमिति शरीरं भवति, एवं द्विरूपयोस्तयोर्मध्ये एको विमर्शो रक्तबिन्दुरूपतां भजते, अपरः प्रकाशः शुक्लबिन्दुभावम् एति, उभयोर्मेलने मिश्ररूपं सर्वतेजोमयं परमात्मस्वरूपं भवति । श्रुतिरपि

‘ एको वर्णो बहुधा शक्तियोगात्
वर्णाननेकान् निहितार्थो दधाति । ’

इति ।

एतदेव बिन्दुत्रयनिरूपणं विवृणोति,—बिन्दुरहंकारात्मा इति, बिन्दुः सितरक्तस्वरूपः अहंकारात्मा अन्तर्गर्भितसमस्तवर्णराशिः अनुत्तरस्फाररूपाहंकारः आत्मा तादात्म्यस्वरूपं यस्य सः । ‘ वर्णात्कारः ’ इति सूत्रेण अहं-शब्दात् कारशब्दप्रत्ययः ऐकार इतिवत्, अत एव एतन्मिथुनसमरसाकारः—एतयोरकार-हकारवाच्ययोः प्रकाशविमर्शयोर्मिथुनं द्वन्द्वं, तस्य दिव्यदम्पतिरूपस्य मिथुनस्य समरसः परस्परानुप्रवेशरूपम् आनुकूल्यं तदेव आकारः स्वरूपं यस्य

सः, एवंभूतो रविः सितशोणबिन्दुसमरसीभूतो मिश्रबिन्दुरित्यर्थः । लोके हि सूर्यस्य मिश्रस्वरूपत्वम् अग्नीषोमयोः, अत एव तस्य उपास्यत्वमाह,—काम इति, काम्यते अभिलष्यते स्वात्मत्वेन परमार्थमहद्भिर्योगिभिरिति कामः, तत्र हेतुः—कमनीयतया इति, कमनीयत्वं स्पृहणीयत्व[illegible]न । कला विमर्शशक्तिः दहनो वह्निः, इन्दुश्चन्द्रः तावेव आ[illegible]ौ ययोर्बिन्द्वोर्दहनेन्दुविग्रहौ बिन्दू । अत्रायमर्थः—अग्नीषोम[illegible]पिणी विमर्शशक्तिः तदुभयभूतकामेश्वराविनाभूता महात्रिपुरसुन्दरी बिन्दुसमष्टिरूपा कामकला इति उच्यते, सैव उपास्यतया सर्वागमेषु उद्घोष्यते । उक्तं च

‘ मिहिरबिन्दुमुखीं तदधो लस-
च्छशिहुताशनबिन्दुयुगस्तनीम् ।
ह-सपरार्धकलारचनास्पदां
भजत नित्यमिमां परदेवताम् ॥ ’
‘ एकारोर्ध्वगतो बिन्दुर्मुखं भानुरधोगतौ ।
स्तनौ दहनशीतांशू योनिर्हार्धकला भवेत् ॥ ’

इत्यादि रहस्यम् । अयमत्र निष्कर्षः—स्वान्तर्गतानन्ताक्षरराशिमहामन्त्रवीर्यपूर्णाहन्तारूपिणी प्रकाशानन्दसारा बिन्दुत्रयसमष्टिरूपलिप्यक्षररूपिणी कामकला नाम महात्रिपुरसुन्दरी मातृका परमयोगिभिः महामाहेश्वरैरनिशम् अनुसर्तव्या इति । विज्ञानभट्टारकेऽपि

'विन्दुरूपस्य चक्रस्य स्थूलवर्णक्रमेण तु ।
अर्धेन्दुविन्दुनादान्तशून्योचाराद्भवेच्छिवः ॥'

इति ॥ ७ ॥

एवं बिन्दुस्वरूपम् उद्दिश्य ज्ञानोपासनायाः फलं परंब्रह्मभाव एव इत्याह

इति कामकलाविद्या
देवीचक्रक्रमात्मिका सेयम् ।
विदिता येन स मुक्तो
भवति महात्रिपुरसुन्दरीरूपः ॥ ८ ॥

पूर्वोक्तमहाप्रबन्धेन व्याख्याता कामकला — महात्रिपुरसुन्दरी, तस्या विद्या ज्ञानं, कीदृशी,? इत्याकाङ्क्षायामाह — देवीचक्रक्रमात्मिका — देव्याः त्रिपुरसुन्दर्याश्चक्रं श्रीचक्रं तस्य क्रमः चक्रमन्त्रदेवतात्मनाभिहितः सर्वानन्दमयादिसमस्तप्रकटपर्यन्तरूपः तदात्मिका तद्विषयिणी, येन — शक्तिपातात् ब्रह्मजिज्ञासुना भावयता पुरुषेण, विदिता अवगता, स पुरुषो मुक्तो भवति,

'विद्याभिज्ञापितैश्वर्यश्चिद्घनो मुक्त एव सः ।'

इति प्रत्यभिज्ञास्थित्या संसारवासनानिरसनपटीयोऽनवरतपरिपूर्णाहंभावभावनाकवलीकृतसर्वप्रपञ्चः परमयोगी विहरते, अन्तेऽपि महात्रिपुरसुन्दरीरूपः — पराभट्टारिकात्मसारूप्यो भवति ॥ ८ ॥

परमार्थभूतप्रकृतबिन्दोरेव सकाशात् जगदुत्पत्त्यादिकं वक्तुम् आरभते

स्फुरितादरुणाद्बिन्दो-
र्नादब्रह्माङ्कुरारवो व्यक्तः ।
तस्माद्गगन-समीरण-
दहनोदक-भूमि-वर्णसंभूतिः ॥ ९ ॥

स्फुरितात् उच्छूनात्, बिन्दोः पूर्वोक्तलक्षणात्, नादब्रह्माङ्कुरः — नादः सर्वशब्दोत्पत्तिहेतुर्वर्णः स एव ब्रह्म, तत् ब्रह्म अङ्कुर उत्पादकं यस्य सः । तथा च उक्तम्

'एको नादात्मको वर्णः सर्वनादाविभागवान् ।
सोऽनस्तमितरूपत्वादनाहत इति श्रुतः ॥'

इति । एवं-भूतनादब्रह्मात्मक आरवः शब्दः पश्यन्त्यादिरूपो, व्यक्त आविर्भूतः, तस्मात् शब्दात्, गगन-समीरण-दहनोद-

कभूमीनां पञ्चभूतानां, वर्णानाम् आदि-क्षान्ताक्षराणां च संभूतिरुत्पत्तिराम्नाता ॥ ९ ॥

एवं शोणबिन्दोः सर्वात्मत्वं सर्वस्रष्टृत्वम् चोक्त्वा, तदिह शुभ्रबिन्दोरपि तत्स्वरूपम् अतिदिशति

अथ विशदादपि बिन्दो-
गगनानिल-वह्नि-वारि-भूमिजनिः ।
एतत्पञ्चकविकृति
जगदिदमण्वाद्यजाण्डपर्यन्तम् ॥ १० ॥

विशदात् सर्वप्रकाशात्, बिन्दोः पूर्वव्याख्यातात्, गगनादिपञ्चभूतात्मकानन्तब्रह्माण्डानि आविर्भावतिरोभावौ भजन्त इत्यर्थः । तथा च आगमः

'स्वेच्छाविलसितानन्तजगद्रश्मिविलासवत् ।
नौमि संविन्महापीठं शिवशक्तिपराश्रयम् ॥'

इति ॥ १० ॥

एवं बिन्दुद्वयाभेदम् उक्त्वा, तद्दृष्टान्ततया मन्त्रदेवतयोरपि ऐक्यमाह

बिन्दुद्वितयं यद्वद्
भेदविहीनं परस्परं तद्वत् ।
विद्यादेवतयोरपि
न भेदलेशोऽस्ति वेद्यवेदकयोः ॥ ११ ॥

विन्दुद्वितयं – पूर्वोक्तप्रकाशविमर्शात्मकं, यद्वत् – येन प्रकारेण, भेदविहीनं

'शिवशक्तिरिति ह्येतत्तत्त्वमाहुर्मनीषिणः ।'

इत्युक्तनीत्या परस्पराश्लिष्टं, तद्वत् तेनैव प्रकारेण, विद्यादेवतयोः – विद्या पञ्चदशाक्षरी देवता महात्रिपुरसुन्दरी तयोर्वेद्यवेदकयोः वाच्यवाचकयोः, भेदलेशोऽपि – ईषद्वैलक्षण्यमपि नास्ति, एवम् अभिन्ननादादिमिथुनात् अखिलं जगत् आविर्भवति इति ॥ ११ ॥

तदेव मिथुनम् आत्मेच्छयैव स्वभेदमस्वभेदमकरोत् इत्याह

वागर्थौ नित्ययुक्तौ
परस्परं शक्तिशिवमयावेतौ ।
सृष्टिस्थितिलयभेदौ
त्रिधा विभक्तौ त्रिबीजरूपेण ॥ १२ ॥

वाक् वर्ण-पद-मन्त्ररूपा, अर्थः कला-तत्त्व-भुवनात्मा, एतद्रूपत्वं कुतः?—प्रकाशविमर्शात्मकशब्दार्थाभ्यामेव षडध्वात्मकसर्वप्रपञ्चोत्पत्तिश्रवणात्, अत एव नित्ययुक्तौ निरन्तरसंसक्तौ, नहि घटपटयोरिव कादाचित्कः संबन्धः, तथा सति सर्वोत्पत्तिप्रसंगः। सृष्टिस्थितिलयभेदौ—सृष्टिः शिवादिक्षितिपर्यन्ततत्त्वजालाविर्भावः, स्थितिः तत्परिपालनं, लयस्तेषां स्वात्मसात्कारः एवं-भूतो भेदो ययोस्तौ। स्वात्मत्वं तु एतेषां त्रयाणां, तथा च अभिनवगुप्तपादाः

'स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः।'

इति। परस्परं शक्तिशिवमयौ प्रकाशविमर्शस्वरूपौ, उभयोरेकत्वात् वह्निदाहकत्ववत् तत्त्वान्तरं न भवति इत्यर्थः। अभियुक्तोक्तिश्च

'तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव।'

इति। एतौ पूर्वोक्तौ प्रकाशविमर्शौ त्रिधा त्रिप्रकारेण संस्थितौ, विभक्तौ पृथग्भूतौ। केन? इत्याह—त्रिबीजरूपेणेति, वाग्भव-कामराज-शक्तिबीजात्मकत्वेन इत्यर्थः। अयमर्थः—बिन्दुत्रयसमष्टिभूतकामकलाक्षररूपिणी महात्रिपुरसुन्दरी सर्वोपास्या इति॥ १२॥

इतः परं वाग्भवादिखण्डत्रयान्तर्गतवस्तुविशेषवर्णनद्वारा श्रीपञ्चदशाक्षरीविद्याम् उद्धर्तुम् उपक्रमते

माता मानं मेयं
बिन्दुत्रयं भिन्नबीजरूपाणि।
धामत्रय-पीठत्रय-
शक्तित्रयभेदभावितान्यपि च॥ १३॥

तेषु क्रमेण लिङ्ग-
त्रयं तद्वच्च मातृकात्रितयम्।
इत्थं त्रितयपुरीया
तुरीयपीठा च भेदिनी विद्या॥ १४॥

माता अवकाशगत ईश्वरः, मानं तदवगतिसाधनभूता विद्या, मेयं ज्ञायमाना महात्रिपुरसुन्दरी, एवं मातृमानमेयभावम् अनुभूय विहरति। धामत्रयं वाग्भवादिकम्, पीठत्रयं कामगिर्यादि, शक्तित्रयम् इच्छादि, एवमादिभेदेन भावितानि, बिन्दुमयत्वात् एतेषां, तेषु धामादिषु विभिन्नेषु, क्रमेण आनुपूर्व्या, लिङ्गत्रयं स्वायंभुवादि, मातृकात्रितयमकारविभेदभिन्नम्, एवंविधसमस्तवस्तुपूरणात् तत्समष्टिरूपा त्रिपुरा नाम पराशक्तिराविर्भूता, इत्याह—इत्थं त्रितयपुरीया इति,

इत्थं पूर्वोक्तप्रकारेण त्रितयानि अवयवानि पुराणि शरीराणि यस्याः सा, अत एव तुरीयस्य पीठा – त्रिविधात्मकसर्वप्रपञ्चाविर्भावतिरोभावभूरित्यर्थः ॥ १३–१४ ॥

इतः परं, तस्मात् गगनसमीरणदहनोदकभूमिवर्णसंभूतिरिति प्रथमसृष्टप्रपञ्चभूतनिष्ठगुणवर्णनद्वारा अक्षरसंख्याविशिष्टमहामन्त्रात्मकदेवतास्वरूपं वक्तुमारभते

शब्द-स्पर्शौ रूपं
रस-गन्धौ चेति भूतसूक्ष्माणि ।
व्यापकमाद्यं व्याप्यं
तूत्तरमेव क्रमेण पञ्चदश ॥ १५ ॥

पञ्चदशाक्षररूपा
नित्या चैषा हि भौतिकाभिमता ।
नित्याः शब्दादिगुण-
प्रभेदभिन्नास्तथानया व्याप्ताः ॥ १६ ॥

नित्यास्तिथ्याकारा-
स्तिथयश्च शिवशक्तिसमरसाकाराः ।

दिवसनिशामय्यस्ताः
श्रीवर्णास्तेऽपि तद्द्वयीरूपाः ॥ १७ ॥

शब्द आकाशगुणः, स्पर्शो वायुगुणः, रूपं तेजोगुणः, रसोऽपां गुणः, गन्धः पृथ्वीगुणः, आकाशमारभ्य एते गुणाः पृथ्वीपर्यन्तम् उत्तरोत्तरम् एकैकगुणाधिक्येन पञ्चदश गुणाः संपद्यन्ते, एतेषां गुणानां पञ्चदशभावेन श्रीविद्या पञ्चदशाक्षरी जाता । भौतिकाभिमता भूतसंबन्धित्वेन अभिमता इष्टा । अत एव पञ्चदशाक्षररूपा स्वस्मात् आदिभूतगुणानां पञ्चदशत्वात् विद्याक्षराणामपि पञ्चदशत्वम् तद्रूपा तत्स्वरूपिणी । नित्या कूटस्था तरङ्गबुद्बुदफेनानाम् अम्बुधिरिव सकलत्वाविर्भावभूमिरित्यर्थः । कूटस्थाया एव षोडश्याः पञ्चदशावयवात्मकपञ्चदशतिथिनिष्ठान्तः । पञ्चदशदेवतामयपञ्चदशाक्षरीरूपतामाह – नित्यास्तिथ्याकारा इति, नित्याः कामेश्वरप्रभृतिविश्रान्ताः, तिथ्याकाराः तिथ्यभिमानिन्यो देवताः । तिथयश्च प्रतिपत्प्रभृतिपूर्णिमान्ताः, शिवशक्तिसमरसाकाराः प्रकाशविमर्शसंपुटाकाराः । अत एव दिवसनिशामय्यः – दिवारात्रिरूपाः प्रकाशविमर्शयोर्दिवारात्रिमयत्वात्, तास्तिथयः श्रीवर्णाः, तेऽपि तेन पूर्वोक्तरूपेण पञ्चदशरूपाः श्रीवर्णाः – विद्यान्तर्गतवर्णगुणा अपि तद्द्वयी-

रूपाः तादृशप्रकाशविमर्शरूपा इत्यर्थः । अयमत्र विवेकः—इयमेव प्रकाशविमर्शमयी परा शक्तिः पञ्चभूतात्मिका उत्तरोत्तरवृद्धिद्वारा पञ्चदशसंख्याकमात्राक्षरतिथ्यभिमानदेवतास्वरूपिणी जाता । यथागमः

'एक एव प्रकाशाख्यः परः कोऽपि महेश्वरः ।
यस्य शक्तिर्विमर्शाख्या सा नित्या गीयते बुधैः ॥
विमर्शाख्या च सा देवी पाञ्चविध्यं समागता ।
आकाशानिलसप्तार्चिःसलिलावनिभेदतः ॥
एकैकगुणवृद्ध्या तु तिथिसंख्यात्वमागता ।
विमर्शरूपिणी विद्या षोडशी या प्रकीर्तिता ।
गता सा षोडशैर्भेदैस्त्रिपुरा परमेश्वरी ॥
सुन्दर्यादिमह·······वां विचित्रान्तं समन्ततः ।
स्वागमादेव बोद्धव्यमिति संकल्पमात्रतः ॥'

इति ॥ १५ ॥ १६ ॥ १७ ॥

उक्तमेव अर्थं द्रढयितुं देवतावत् विद्याया अपि विश्वात्मकत्वं तदुत्तीर्णत्वं च वक्तुमाह

स्वर-व्यञ्जन-बिन्दुत्रय-
समष्टिभेदैर्विभाविताकारा ।

षट्त्रिंशत्तत्त्वात्मा
तत्त्वातीता च केवला विद्या ॥ १८ ॥

विद्यापि तादृगात्मा
सूक्ष्मा सा त्रिपुरसुन्दरी देवी ।
विद्यावेद्यात्मकयो-
रत्यन्ताभेदमामनन्त्यार्याः ॥ १९ ॥

स्वराः अचः, व्यञ्जनानि हलः, बिन्दुत्रयम् अनुस्वारत्रयम्, एषां समष्टिः समुदायभावः, भेदोऽवयवभावः तैर्विभाविताकारा उद्भावितस्वरूपा । अत एव षट्त्रिंशत्तत्त्वात्मा शिवादि-क्षित्यन्तविग्रहा । तत्त्वातीता च—तत्त्वसंघसमुदायस्थानत्वात् तदुत्तीर्णा च । अत एव केवला स्वव्यतिरिक्तस्य अभावात् एकाकिनी । एवंभूता विद्या श्रीपञ्चदशाक्षरीत्यर्थः । अयमत्र विद्यायामवयवविभागप्रकारः,—इह पुण्यानन्दाः हादिविद्यायाम् अत्यन्ताभिमानिनोऽस्या एव विद्याया अवयवभावसमुदायम् आश्रित्य तत्त्वात्मकत्वं तदुत्तीर्णत्वं चाचक्षते । तत्र च वाग्भवाख्ये प्रथमखण्डे पञ्च स्वराः सप्त व्यञ्जनानि संहत्य द्वादश वर्णाः । कामराजाख्ये द्वितीयखण्डे षट् स्वराः अष्ट व्यञ्जनानि संभूय चतुर्दश वर्णाः ।

शक्त्याख्ये तृतीयखण्डे च चत्वारः स्वराः षट् व्यञ्जनानि संहत्य दश वर्णाः । सर्वेऽपि संभूय षट्त्रिंशदक्षराणि अवयवरूपाणि समुदायरूपाणि । विद्या सर्वतत्त्वातिक्रान्ता सर्वत्र प्रसिद्धा श्रूयते, कादेरपि विद्याया उभयात्मकत्वम् अस्त्येव, यया नैव अनयोर्विद्ययोर्भेदः । हादौ प्रथमखण्डे पञ्च स्वराः सप्त व्यञ्जनानि संहत्य विद्याद्वयेऽपि प्रथमखण्डे द्वादशवर्णत्वं समानं, तस्मात् उभयात्मकत्वम् उभयोर्विद्ययोरस्त्येव । तदुभयविद्योपासनप्रकारस्तु गुरुमुखादेव अवगन्तव्यः । देवताया अपि मन्त्रवत् उभयात्मकत्वम् , इति मन्त्रदेवतयोरैक्यम् आह – 'विद्यापि तादृगात्मा' इति – विद्या चिदानन्दस्वरूपिणी तादृगात्मिका तदुत्तीर्णा च सूक्ष्मा परिच्छेत्तुम् अशक्या, सा सर्ववेदान्तेषु प्रसिद्धा त्रिपुरसुन्दरी, त्रिपुरा च सुन्दरी त्रिधावस्थितसमस्तवस्तुपूरणात् सर्वयोगिभिरुपास्यत्वेन स्पृहणीयत्वाच्च, त्रिपुराशब्दनिर्वचनं च पूर्वमेव प्रपञ्चितम् । देवी स्वच्छप्रकाशरूपा विश्वस्य जननादिक्रियारूपा परा वाक्, विद्यावेद्यात्मकयोरत्यन्ताभेदम् आमनन्त्यार्याः परमेश्वरप्रमुखाः सर्वयोगिन इत्यर्थः ॥ १९ ॥

एवं विद्यादेवतयोरभेदम् उक्त्वा, चक्रदेवतयोरैक्यं वक्तुं चक्रोत्पत्तिप्रकारम् आह

या सान्तरोहरूपा
परा महेशी त्रिभाविता सैव ।
स्पष्टा पश्यन्त्यादि-
त्रिमातृकात्मा चक्रतां याता ॥ २० ॥

चक्रस्यापि महेश्या
न भेदलेशोऽपि भाव्यते विबुधैः ।
अनयोः सूक्ष्माकारा
परैव स्थूलयोश्च न कापि भिदा ॥ २१ ॥

या सान्तरोहरूपा इति – अन्तरम् अन्तःकरणं तस्मिन् ऊहः वितर्कः इत्थमिति परिच्छेदरहितः तेन सहितं रूपं यस्याः सा । अयमर्थः – अवाङ्मनसगोचरत्वात् सर्ववेदान्तैरपरिच्छेद्या सर्वकारणभूता शिवादि-धरण्यन्ततत्त्वसंघाताविर्भावभूमिः महेश्वरी परा सर्वोत्कृष्टा इत्युच्यते । श्रुतिश्च

परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ।

एवंभूतलक्षणा सैव – पराशक्तिरेव, त्रिभाविता त्रिप्रकारत्वेन

भाविता संज्ञायमाना, एतदेवाह – स्पष्टा पश्यन्त्यादित्रिमातृकात्मा इति, स्पष्टा प्रथमोत्पन्नत्वेन विवक्षिता विषयिणी पश्यन्तीति उच्यते आदिशब्देन मध्यमा वैखरी च, सैव वैखरी नाम अभिलापरूपिणी पञ्चदशाक्षरराशिमयी सर्ववैदिकलौकिकशब्दनात्मिका शक्तिरित्युच्यते। तथा च सुभगोदयवासनायाम्

‘परा भूर्जन्म पश्यन्ती वल्लीगुच्छसमुद्भवा।
मध्यमा सौरभा वैखर्यक्षमाला जयत्यसौ ॥’

एवंरूपत्रिमातृकात्मिका सैव चक्रतां याता – त्रिखण्डात्मकचक्रैक्यमिवाप्ता इत्यर्थः । एतदेवाह – चक्रस्य इति, चक्रस्य त्रैलोक्यमोहनादि-बैन्दवान्तनवावरणात्मकस्य सुन्दर्यधिष्ठानभूतस्य, महेश्यास्तदधिष्ठात्र्याः सुन्दर्याश्च भेदलेशः ईषद्भेदोऽपि बुधैर्माहेश्वरैर्न भाव्यते न अनुभूयते, कुतः? – श्रीसुन्दरीरूपत्वात् श्रीचक्रस्य । पुनरपि अनयोस्तादृगभेदम् आचष्टे – अनयोः सूक्ष्माकारा इत्यादिना, अनयोः सूक्ष्मरूपयोश्चक्रदेवतयोः – सूक्ष्मरूपत्वं नाम अपरिच्छिन्नत्वमेव, तत्र श्रीचक्रस्य सूक्ष्मरूपेण अवस्थानं बिन्द्वात्मना, बिन्दोश्च अपरिच्छिन्नत्वं ‘बैन्दवे परमाकाशे’ इत्यादिना प्रपञ्चितमेव । देवताया अपि ‘विद्यापि तादृगात्मा’ इत्यादिना अभिहितमेव । तथा स्थूलयोश्चक्रदेवतयोश्च, अत्र स्थूलत्वं

नाम चक्रस्य त्रिकोणादिचतुरश्रपर्यन्तं विजृम्भणम्, देवताया अपि त्रिपुराम्बिकादि-त्रिपुराशक्त्यन्तरूपेण मननम्, एवंविधयोश्चक्रदेवतयोः, भिदा – भेदः कारणादित्यर्थः । तत्र हेतुमाह – परैव सूक्ष्माकारा इति, सा पूर्वोक्तलक्षणा परैव आदिशक्तिरेव सूक्ष्माकारा सूक्ष्मभूत आकारः स्वरूपमनयोरित्यर्थः ॥ २० ॥ २१ ॥

देवतारूपस्य चक्रस्य इतः परं परा-पश्यन्त्यादिशक्तिविकासरूपं नवयोन्यात्मकं श्रीचक्रं वक्तुम् आदौ बैन्दवं सर्वानन्दमयाख्यचक्रं पराशक्तिमयम्, इत्याह

मध्यं चक्रस्य स्यात्
परामयं बिन्दुतत्त्वमेवेदम् ।
उच्छूनं तच्च यदा
त्रिकोणरूपेण परिणतं स्पष्टम् ॥२२॥

एतत्पश्यन्त्यादि-
त्रितयनिदानं त्रिबीजरूपं च ।

चक्रस्य नवयोन्यात्मकस्य, मध्यं मध्येभवं, बिन्दुतत्त्वं बिन्दुस्वरूपं पूर्वमेव व्याख्यातम् । इदं स्वसाक्षात्कृतं परामयमेव पराशक्तिस्वरूपमेव इत्यर्थः । एतदेव बिन्दुतत्त्वं यदा विकासभावम् एति तदा त्रिकोणचक्रम् उदेति इत्याह— उच्छूनं तच्च यदा इति, यदा यस्मिन् काले प्राणिनाम् अदृष्टवशात् उच्छूनं, तच्च — बैन्दवमपि उच्छूनं संजातविकासं भवति, तदा त्रिकोणरूपेण — अनुत्तरानन्देच्छासंघट्टरूपेण परिणतं, त्रिकोणाकारं भवति इत्यर्थः । एतत् — त्रिकोणचक्रं, पश्यन्त्यादित्रितयनिदानं — पश्यन्ती-मध्यमा-वैखरीप्रमुखशक्तित्रयोत्पत्तिकारणमित्यर्थः । तथाह

‘इच्छाशक्तिस्तथा वामा पश्यन्तीवपुषा स्थिता ।
ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता ॥
ऋजुरेखामयी विश्वस्थिता प्रथितविग्रहा ।
तत्संहृतिदशायां तु बैन्दवं रूपमास्थिता ॥
प्रत्यावृत्तिक्रमेणैव शृङ्गाटवपुरुज्ज्वला ।
क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा ॥’

इति । त्रिबीजरूपं च इति, — त्रिबीजानि त्रिखण्डात्मकानि वाग्भव-कामराज-शक्तिबीजानां रूपं यस्य तत् ॥ २२ ॥

ततः श्रीभट्टारिकायामेव बिन्दुतत्त्वम् ऊर्ध्वाधोमुखनवयोन्यात्मकश्रीचक्रमभवत्, इत्याह

वामा ज्येष्ठा रौद्री
चाम्बिका चानुत्तरांशभूताः स्युः ॥ २३ ॥

इच्छा-ज्ञान-क्रिया-
शान्ताश्चैतास्तथोत्तरावयवाः ।
व्यस्ताव्यस्तं तदर्ण-
द्वयमिदमेकादशात्म पश्यन्ती ॥ २४ ॥

वामा ज्येष्ठा रौद्री अम्बिका चकारात् पराशक्तिश्च इमाः पञ्चशक्तयः, अनुत्तरांशभूताः — अनुत्तरांशत्वेन श्रीचक्रान्तर्गताधोमुखपञ्च-त्रिकोणाकृतित्वेन भूता जाता इत्यर्थः । इच्छा-ज्ञान-क्रिया-शान्ताः एताश्चतस्रः शक्तयः उत्तरावयवाः ऊर्ध्वमुखत्रिकोणचतुष्टयरूपाः । अयं भावः—पराविलसनरूपा एताः रौद्री-वामा-ज्येष्ठा-अम्बिकाः, इच्छा-ज्ञान-क्रिया-शान्ताश्चैतास्तथोत्तरावयवाश्च इति, एतच्छक्तिनवकमयं नवत्रिकोणं चक्रमिति । व्यस्ताव्यस्तं तदर्णद्वयं — व्यस्तं व्यष्टिरूपम् अव्यस्तं समष्टिरूपं सर्वोपनिषत्प्रसिद्धमर्णद्वयं संदंशन्यायेन अखिलाक्षरात्मकमन्त्रमयप्रकाशविमर्शरूपपूर्णाहन्ताभावगर्भकामकलाक्षरात्मबिन्दुतत्त्वमित्यर्थः । एवंभूतं तदर्णद्वयम् एका-

दशात्म, मत्या विचार्यमाणमेकादशविधं भवति इत्यर्थः। परादि-शान्तान्तं शक्तिदशकं व्यष्टिरूपं सर्वसमष्टिरूपत्वेन चैकं, तेन एकादशात्मकम् इदं बिन्दुतत्त्वमेव पश्यन्तीकारणम् ॥ २३ ॥ २४ ॥

इतः परं वसुकोण-दशारादिसृष्टिचक्रमकारम् अभिधातुं परमप्रकृतत्रिकोणचक्रक्रमं निगमयति

एवं कामकलात्मा
त्रिबिन्दुतत्त्वस्वरूपवर्णमयी ।
सेयं त्रिकोणरूपं
याता त्रिगुणस्वरूपिणी माता ॥२५॥

एका परा.................

एवं – पूर्वोक्तप्रकारेण, कामकलात्मा – कामः प्रकाशैक-स्वभावोऽनुत्तराक्षरात्मा परमशिवः कला तु अखिलवाणी-रूपपरमाहम्-अक्षरमयी विमर्शविग्रहा, एवं तदुभयात्मकत्वं नाम स्वाभाविकपरिपूर्णाहंभावशालित्वम् । एतच्च 'बिन्दुरहं-कारात्मा' इत्यत्र स्पष्टम् अभिहितम्, एवंरूपा कामकलात्मा त्रिबिन्दुतत्त्वस्वरूपवर्णमयी – बिन्दवः पूर्वोक्तरक्त-शुक्ल-मिश्रा-

त्मानः तेषां भावः तत्त्वं तत्स्वरूपा [illegible] वाग्भवादय-स्तदात्मिका । तथा रहस्याम्नाये

'बिन्दुत्रयात्मकं स्वात्मशृङ्गाटं विद्धि सुन्दरम् ।
मिश्रं शुक्लं च रक्तं च पुराणं प्रणवात्मकम् ॥
रेखात्रयावगन्तव्यं संविन्मात्रं शिवात्मकम् ।'

सेयं त्रिकोणरूपम् आपन्ना चिदानन्दघनरसपरमार्था सक-लाम्नायसारभूता, विश्वाहंभावभावनाशालिभिर्महायोगिवरै-रात्मसाक्षात्त्वेन अनुभूयमाना, त्रिगुणा इच्छा-ज्ञान-क्रिया-शक्तिमयी, एवं [illegible], अत एव सर्वजगन्निर्मात्री एका । तथा च वचनम्

'अनुत्तरानन्दवि[illegible] इच्छाशक्तौ नियोजिते ।
त्रिकोणमिति तत्[illegible]र्विसर्गामोदसुन्दरम् ॥'

इति ॥ २५ ॥

इतः परं विलसनरू[illegible] पश्यन्त्या अपि नवयोनिच-क्रात्मना नवात्मकत्वमाह

.............तदन्या
वामादिव्यष्टिमाः सृष्ट्यात्मा ।

तेन नवात्मा जाता
माता.......................... ॥

तदन्या पराविकासभूता पश्यन्ती, वामादिव्यष्टिमात्रस्र-ष्ट्यात्मा – वामादि-शान्तादिशक्तिनवकमयी, यतः तेन कार-णेन सा, माता – पश्यन्ती नाम जननी, नवात्मा – वामादि-शान्तान्तशक्तिकदम्बकाविर्भावकारणनवयोनिचक्रात्मिका, जाता प्रादुर्भूता इत्यर्थः। अत्र वामादिशक्तीनां प्रसङ्गात् किंचित् उच्यते, – तत्र वामा नाम शृङ्गाटान्तःस्थितमपञ्चवम-नात् विश्वजनयित्रीत्यभिधीयते, ज्येष्ठा सर्वमङ्गलकारिणी, रौद्री सर्वरोगविद्राविणी, समस्तेष्टप्रदा शक्तिरम्बिका च

'सा स्फुरत्ता महासत्ता'

इति प्रत्यभिज्ञास्थित्या सर्वातिशायिनी परावाक् परिपूर्णस्व-रूपस्वात्मस्फुरणावलोकनचतुरा, इच्छा-ज्ञान-क्रियाशक्तयस्तु पश्यन्ती-मध्यमा-वैखरीरूपाः, आह चतुर्थी शान्ता, चतुःशत्यां,

'शान्ता च निष्कलं शान्तम्'

इत्यादिश्रुत्या ॥ २६ ॥

अनन्तरं मध्यमाया अपि प्रकारान्तरेण नवात्मकत्वं ब्रूते

..सा मध्यमाभिधानाभ्याम् ॥२६॥

द्विविधा मध्यमा सा
सूक्ष्म-स्थूलाकृतिः स्थिता सूक्ष्मा।
नवनादमयी स्थूला
नववर्णात्मा च भूतलिप्याख्या॥२७॥

आद्या कारणमन्या
कार्यं त्वनयोर्यतस्ततो हेतोः।
सैवेयं नहि भेद-
स्तादात्म्यं हेतुहेतुमदभीष्टम् ॥ २८ ॥

मध्यमा परापश्यन्त्योः समरसावस्थे, अभिधानाभ्यां नामधेयाभ्यां सा, अतः सुखं परमयोगिभिर्दृश्या मध्यमा नाम शक्तिः द्विविधा द्विप्रकारा – स्थूल-सूक्ष्मभावात्, तत्र सूक्ष्मा समाधिबलेन अनुभूयमाना, स्थूलाकृतिः पण्डितपामराद्यभि-लपनयोग्या वर्णावल्यास्थिता सर्वदा वर्तमाना। एतदेव व्याचष्टे 'सूक्ष्मा नवनादमयी स्थूला नववर्णात्मा' इति।

अयमर्थः—मित्रावरुणसदनात् वायुनिरोधनेन स्वाधिष्ठानादिकमलभेदपुरःसरं द्वादशान्तारविन्दासनस्थपरमशिवाङ्कम् उपसर्पन्ती महामातृका कुण्डलिनी बहुविधनादात्मिका या अनुभूयते, सा समाधिसमधिगतसर्वार्थैर्महामाहेश्वरैः स्वात्मत्वेन मन्यते। नवनादमयी इति,—चिणीति प्रथमः, चिणिचिणीति द्वितीयः, घण्टानादस्तृतीयः, शङ्खनादश्चतुर्थः, पञ्चमस्तन्त्रीनादः, षष्ठस्तालनादः, सप्तमो वेणुनादः, अष्टमो भेरीनादः, नवमो मृदङ्गनादः। भूतलिप्याख्या—भूताश्च ते लिपयश्च भूतलिपयः, अत्र लिपीनां भूतत्वम् चेष्टाविशेषाक्षरन्यासाभिव्यङ्ग्यत्वम्, तच्च कल्पनामात्रमेव—अक्षराणां तेजोरूपशक्त्यात्मकत्वात् तेषामाख्या अभिधा यस्याः, सूक्ष्मरूपा हि मध्यमा स्थूलरूपायाः कारणभावम् आपन्ना एका एव, इत्यत आह—आद्या कारणमित्यादि, आद्या पूर्वोक्ता सूक्ष्मा कारणं—प्रथमोद्भवात्, अन्या स्थूला कार्यं—तज्जन्यत्वात्, यतः तस्मात् कारणात् अनयोः सूक्ष्म-स्थूलयोः कार्यकारणभावः, ततो हेतोः—तेन कारणेन, इयं स्थूला सैव सूक्ष्मा शक्तिरेव, नहि भेदः—भेदो नास्त्येव। ननु कथम् अभेदे कार्यकारणभावः? इत्यत्राह—तादात्म्यमिति, तादात्म्यं—भेदाभेदरूपं, हेतुहेतुमत्—जन्यजनकरूपम्, अभीष्टम्—मृद्घटवत् वाचारम्भणमात्रत्वात् एकमेव वस्तु उभयविधं भवति सर्ववेदान्तसंमतमित्यर्थः ॥ २७ ॥ २८ ॥

अनन्तरं मध्यशृङ्गाटतेजःप्रसरणात्मकवसुकोणादिचक्रनिरूपणद्वारा वैखरीशक्त्याविर्भावम् आह

शषसपवर्गमयं
तद्वसुकोणं मध्यकोणविस्तारः।
नवकोणं मध्यं चे-
त्यस्मिंश्चिद्दीपदीपिके दशके ॥२९॥

शषसपवर्गमयं,—शषसपवर्गात्मकाष्टकोणस्य विस्तारो विकासभूतः, तत्तादृशमध्यत्रिकोणसहितं नवकोणं मध्यं च बैन्दवाख्यं संहृत्य दशके अस्मिंस्त्रिकोण-वसुकोणचिद्दीपदीपिके

'बैन्दवासनसंरूढसंवर्तानलचिद्घनम्।'

इत्युक्तरीत्या बिन्दुचक्राधिरूढायास्तेजोभूते–त्रिपुरायाः प्रभापटलप्रकाशिते इत्यर्थः ॥ २९ ॥

तच्छायाद्वितयमिदं
दशारचक्रद्वयात्मना विततम्।

तस्य पूर्वोक्तस्य तेजोराशिमयस्य चक्रत्रितयस्य, च्छाया-द्वितयं कान्तिद्वितयं – सर्वरक्षाकर-सर्वार्थसाधकाभिधचक्रद्वयात्मना परिणतम् इत्यर्थः । तथा च उक्तम्

' नवत्रिकोणस्फुरितप्रभारूपदशारकम् ।'

इति ॥

तच्चक्रद्वयस्वरूपं व्याचष्टे

त-ट-च-कवर्गचतुष्टय-
विलसनविस्पष्टकोणविस्तारम् ॥३०॥

तवर्ग-टवर्गात्माक्षरदशकरूपम् अन्तर्दशारम्, चवर्ग-कवर्गात्मकाक्षरदशाररूपम् बहिर्दशारमित्यर्थः ॥ ३० ॥

एतच्चतुष्कप्रभया
समुपेतं दशारपरिणामः ।

एतच्चक्रचतुष्कस्य – बिन्दु-त्रिकोण-वसुकोणान्तर्दशारात्मकचक्रचतुष्कस्य प्रभा कान्तिस्तया, समुपेतं संयुक्तं, दशारपरिणामः – बहिर्दशारचक्रमिति यावत्, बहिर्दशारचक्रस्य बैन्दवादिचक्रचतुष्टयसंनिधानादेव तात्पर्यं, तत्तत्प्रभा व्याप्नोति इत्यर्थः। तथा च उक्तम्

' चतुश्चक्रप्रभारूपसंयुक्तपरिणामतः । '

इति ॥

अथ एतच्चक्रचतुष्कस्य त्रिकोण-वसुकोण-दशारद्वयरूपस्य स्वरूपमाह

आदिस्वरचतुर्दश-
वर्णमयाश्रं चतुर्दशारमभूत् ॥ ३१ ॥

अकारादिचतुर्दशवर्णात्मचतुर्दशकोणसहितं सर्वसौभाग्यदायकाभिधं चक्रमित्यर्थः ॥ ३१ ॥

एवं बैन्दवादिमनुकोणान्तपर्यन्तचक्रवर्णनद्वारा वैखरीशक्तिराविर्भूता इत्याह

परया पश्यन्त्यापि च
मध्यमया स्थूलवर्णरूपिण्या ।
आभिरेकोनपञ्चा-
शदक्षरात्मा वैखरी जाता ॥ ३२ ॥

अयमर्थः – आदि-क्षान्ताक्षरराशिमयाखिलप्रपञ्चनिर्मात्री सर्वशब्दात्मिका वैखरी इति ॥ ३२ ॥

इतः परं सर्वसंक्षोभण-सर्वाशापरिपूरकाभिधचक्रद्वयं वैखरीवर्णात्मकमेव, – इत्याह

कादिभिरष्टभिरुपचित-
मष्टदलाब्जं च वैखरीवर्गैः ॥
स्वरगणसमुदितमेतद्
द्व्यष्टदलाम्भोरुहं च संचिन्त्यम् ॥३३॥

वैखरीवर्गैः – वैखरीशक्तिस्वरूपैः, अष्टभिः कादिभिः, उपचितं – सम्यक् प्रोतम्, अष्टदलाब्जं च – सर्वसंक्षोभणचक्रम् । तथा स्वरगणसमुदितम् – स्वरगणैः अकारादिषोडशवर्णैः, समुदितं सम्यक् भावितम्, एतत् – परिदृश्यमानं, द्व्यष्टदलाम्भोरुहं – सर्वाशापरिपूरकचक्रम्, संचिन्त्यम् – सदा भावनीयम् इत्यर्थः ॥ ३३ ॥

बिन्दुत्रयमयतेज-
स्त्रितयविकारं च तानि वृत्तानि ।

भूबिम्बत्रयमेतत्
पश्यन्त्यादित्रिमातृविश्रान्ति ॥ ३४ ॥

तानि वृत्तानि – मन्वश्रोपरि अष्टदलपद्मोपरि षोडशदलपद्मोपरि च स्थितानि, बिन्दुत्रयं – पूर्वोक्तरक्तशुक्लमिश्रात्मकं, तन्मयं यत् तेजस्त्रितयं – सोम-सूर्याग्निरूपं, तद्विकारस्तन्मयानि इत्यर्थः । तत्र वृत्तस्थतेजस्त्रयात्मकत्वकथनेन सोमसूर्यानलत्रिखण्डमयत्वं चक्रस्योक्तं, तद्विकारश्चेति तानि वृत्तानि, 'वेदाः प्रमाणम्' इति-वत् द्रष्टव्यम् । भूबिम्बत्रयम् – अणिमादिब्राह्म्यादि-सर्वसंक्षोभिणीमुद्रादिशक्तिकदम्बकवासनाभूतं, पश्यन्त्यादित्रिमातृविश्रान्ति – पश्यन्ती-मध्यमा-वैखरीशक्तय एतावत्पर्यन्तं विजृम्भमाणाः त्रिकोणादि-भूपुरपर्यन्तश्रीचक्रात्मना चकासत इत्यर्थः । एतच्च 'आत्मनः स्फुरणम्' इत्यारभ्य 'वैखरी विश्वविग्रहा' इत्यन्तेन ग्रन्थजालेन सम्यक् ईरितम् ॥ ३४ ॥

एवं 'मध्यं चक्रस्य स्यात्' इत्यादि उपक्रम्य 'पश्यन्त्यादित्रिमातृविश्रान्ति' इत्यन्तं श्रीमहात्रिपुरसुन्दर्याः श्रीचक्रं सम्यक् निरूप्य, अनन्तरं 'अणिमादिभूतयोऽस्याः' इत्यन्तं तस्या आवरणचक्रान्तर्गतशक्तिनिकुरम्ब-तन्निकटस्थितश्रीगुरुमण्डलमपि श्रीदेव्यवयवपरिणतिरूपमेव, इत्याह

क्रमणं पदविक्षेपः
क्रमोदयस्तेन कथ्यते द्वेधा ।
आवरणं गुरुपङ्क्ति-
द्वयमिदमम्बापदाम्बुजप्रसरम् ॥ ३५ ॥

क्रमणं पदक्रमः, स च द्विविधः – पदविक्षेपरूपः क्रमोदयरूपश्च, तत्र पदविक्षेपो नाम सुन्दर्यश्चानन्तकोटिकिरणात्मकानन्तशक्तिजननसामर्थ्यं, क्रमोदयो नाम दिव्य-सिद्ध-मानवौघरूपानन्तप्रकाशात्मकश्रीगुरुमण्डलात्मकतया प्रसरणम् । एतद्वृन्दचक्रद्वयं विवृणोति – आवरणमिति, आवरणचक्रस्थितशक्तिनिकुरम्बं 'मञ्चाः क्रोशन्ति' इतिवत् । गुरुपङ्क्तिः – गुरुमण्डलम्, इदं द्वयम्, अम्बापादाम्बुजप्रसरम् – अम्बायास्त्रिपुरायाः पादाम्बुजस्य श्रीपादयुगस्य प्रसरः प्रसरणं विजृम्भणम् इति यावत् ॥ ३५ ॥

तत्प्रसारप्रसरणीं क्रमशो विवृणोति

सेयं परा महेशी
चक्राकारेण परिणमेत यदा ।

तद्देहावयवानां
परिणतिरावरणदेवताः सर्वाः ॥ ३६ ॥

आसीना बिन्दुमये
चक्रे सा त्रिपुरसुन्दरी देवी ।
कामेश्वराङ्कनिलया
कलया चन्द्रस्य कल्पितोत्तंसा ॥ ३७ ॥

पाशाङ्कुशेक्षुचाप-
प्रसूनशरपञ्चकाञ्चितस्वकरा ।
बालारुणारुणाङ्गी
शशिभानुकृशानुलोचनत्रितया ॥ ३८ ॥

सेयम् अपरिच्छिन्नानन्ततेजोराशिमयी परा सर्वोत्कृष्टा अनन्तकोटियोगिनीवृन्दसमाराधितनित्यनिरवधिकातिशयानन्दमयात्मसाम्राज्यसंपदभिमानशालिनी चक्राकारेण

'चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकम् ।'

इति बैन्दवादित्रैलोक्यमोहनान्तचक्रनवकात्मना,

'स्फुरत्तामात्मनः पश्येत्....।'

इति पूर्णानन्दमयात्मावलोकनसमये परिणमेत आकारान्तरेण, तद्देहावयवानां – तस्यास्त्रिपुरायाः देहः तेजःपुञ्जात्मकः, तथा अवयवाः किरणाः, तेषां परिणतिः अवस्थान्तरापत्तिः। इह आवरणदेवताः – वशिन्याद्यणिमाद्यनन्तशक्तिनिकुरम्बं चिदानन्दसमुद्रात्मकमेव सकाशत्वे फेन-बुद्बुद-तरङ्गादिवत् अनन्तकोटिशक्तयः प्रादुर्भावतिरोभावौ भजन्ति, इत्यर्थः।

आसीनेत्यादि, विन्दुमये सर्वानन्दाख्यपरमाकाशे –

'बैन्दवे परमाकाशे'

इत्युक्तत्वात् इत्यर्थः। चक्रे – आत्मसंक्रमविहारपीठे, आसीना उपरि प्रदेशे विराजमाना, सा देशकालाकारानवच्छिन्ना तत्स्वरूपिणी, त्रिपुरसुन्दरी सर्वकारणत्वेन स्पृहणीया स्वच्छा वा, कामेश्वराङ्कनिलया – कामेश्वरस्य श्रीनाथस्य, अङ्कं वामोरुभागः, निलयः आवासस्थानं यस्याः सा। तथोक्तं परमशिवेन

'कला विद्या पराशक्तिः श्रीचक्राकाररूपिणी।
तन्मध्ये बैन्दवं स्थानं तत्रास्ते परमेश्वरी॥
सदाशिवेन संपृक्ता सर्वतत्त्वार्थगर्भिणी।'

इत्यादि। देवी विश्वसृजनादिव्यापारविनोदिनी, पाशः

स्वात्मभेदबन्धन इच्छाशक्तिस्वरूपः, अङ्कुशः स्वरूपभेददलनोपायात्मकः ज्ञानशक्तिमयः, इक्षुचाप-पुष्पेषुपञ्चके स्वाभिन्नाकारावर्जिसाधनभूतक्रियाशक्तिस्वरूपे। अयमर्थः इच्छा-ज्ञान-क्रियाशक्तय एव तदाज्ञया पाशादिस्वरूपम् आपन्नाः तदुपासनम् आचरन्ति इत्यर्थः। तथा च

'इच्छाशक्तिमयं पाशं ज्ञानमङ्कुशरूपिणम्।
क्रियाशक्तिमये वाणधनुषी दधदुज्ज्वलम्॥'

इति ॥ ३६ ॥ ३७ ॥ ३८ ॥

एतदेव दिव्यमिथुनं, दिव्यसिद्धाः – अविशेषभेदभिन्नगुरुमण्डलस्वरूपम् उपासत इत्याह

तन्मिथुनं गुणभेदाद्-
आस्ते बिन्दुत्रयात्मके त्र्यश्रे।
कामेश्वरिमित्रेश्वरि-
प्रमुखद्वन्द्वत्रयात्मना विततम्॥३९॥

तन्मिथुनं, तत्–सर्वातीतत्वेन सर्वोपनिषत्प्रसिद्धं कामकामेश्वरीरूपम्। अयमर्थः – परमात्मा हि स्वात्मानमेव स्त्रीपुंसमयं कृत्वा मिथुनरूपेण विहरते। प्रकाशविमर्शात्मना मिथुनी-

भूतः परमशिव एव सकलतन्त्रं समवतारयत्, इति। एवं च तत् मिथुनं कामकामेश्वरीरूपं – मित्रेश्वरी श्रीमदूर्ध्वदीपनाथः, वज्रेश्वरी ज्येष्ठानाथः, भगमालिनी मित्रदेवनाथः, एवमादि-मिथुनत्रयात्मना दिव्य-सिद्ध-मानवौघादिक्रमरूपेण विततं मिथुनत्रयं विसृतमित्यर्थः ॥ ३९ ॥

इतः परम् आवरणदेवतास्वरूपभावौ वर्णयति ।

वसुकोणनिवासिन्यो
यास्ताः संध्यारुणा वशिन्याद्याः ।
पुर्यष्टकमेवेदं
चक्रतनोः संविदात्मनो देव्याः ॥४०॥

वसुकोणनिवासिन्यः – सर्वरोगहराख्यचक्रनिवासशीलाः या वशिन्याद्या अष्ट शक्तयः पूर्णाहंभावानन्ददानसमर्थाः, कथमत्र रोगहरत्वं नाम पूर्णाहंभावप्रदत्वमेव

‘अपूर्णमन्यता व्याधिः कार्पण्यैकनिधानभूः ।’

इत्युक्तेः । एवं-भूताः ताः संध्यारुणाः अरुणाकारा भासन्ते इत्यर्थः । अत एव इदमष्टकोणचक्रं, संविदात्मनः – संवित् ज्ञानमेव आत्मा स्वरूपं यस्याः सा

‘सत्यं ज्ञानमनन्तम्’

इति श्रुतेः

‘स्वसंवित्त्रिपुरा देवी……………।’

इत्यागमाच्च, देव्याः

‘बहु स्यां प्रजायेय’

इति विहरणस्वभावायाः, श्रीचक्रतनोः – चक्रात्मिकायाः सूक्ष्मपुर्यष्टकशरीरम् इत्यर्थः ॥ ४० ॥

तद्विषयवृत्तयस्ताः
सर्वज्ञादिस्वरूपमापन्नाः ।
अन्तर्दशारनिलया
लसन्ति शरदिन्दुसुन्दराकाराः ॥४१॥

तद्विषयवृत्तयः – वसुकोणनिकटवासिन्यः, ताः – वस्वाद्यात्मरूपरक्षणधारित्वेन प्रसिद्धाः, सर्वज्ञादिशक्तिदशकरूपं प्राप्ताः, अन्तर्दशारनिलयाः – सर्वरक्षाकराभिधेयचक्रसमारूढाः निगर्भयोगिन्यः, शरदिन्दुसुन्दराकाराः – स्वप्रकाशधवलाकृतयो लसन्ति – प्रकाशन्ते ॥ ४१ ॥

तद्बाह्यपङ्क्तिकोणेषु
योगिन्यः सर्वसिद्धिदाः पूर्वाः ।
देवीधीकर्मेन्द्रिय-
विषयमय्यो विशदवेशभूषाढ्याः ॥४२॥

तद्बाह्यपङ्क्तिकोणेषु तस्य सर्वरक्षाकरचक्रस्य बाह्यभूतेषु उपरिस्थितेषु पङ्क्तिकोणेषु सर्वार्थसाधके चक्रे तस्य कोणात्मकत्वात् स्थिताः, योगिन्यः कुलकौलनामधेयाः, सर्वसिद्धिदाः, पूर्वाः – सर्वसिद्धिप्रमुखा दश शक्तयः, देवीधीकर्मेन्द्रियविषयमय्यः – देव्यास्त्रिपुरायाः धीकर्मेन्द्रियाणि तेषां विषयास्तन्मय्यस्तत्स्वरूपाः, विशदवेशभूषाढ्याः – विशदाः शुभ्राकारा वेशाश्च भूषाश्च तैराढ्याः । अयमर्थः – मन्त्रदेवतात्माभेदरूपसिद्धिदायिन्यः स्वच्छाकृतयः शुभ्राभरणा भासन्ते इत्यर्थः ॥ ४२ ॥

भुवनारचक्रभवना
देवीमनुकरणविवरणस्फुरणाः ।
संध्यासवर्णवसनाः
संचिन्त्याः संप्रदाययोगिन्यः ॥ ४३ ॥

भुवनारचक्रं सर्वसौभाग्यदायकं चक्रं भवनम् आवासस्थानं यासां ताः, देवीमनुकरणानि – चतुर्दशकरणानि, ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मनोबुद्ध्यहंकारचित्ताख्यानि चत्वारि तेषां विवरणं व्याख्यानभूतं स्फुरणं चतुर्दशाररूपं यासां ताः, देवी तु स्वयमेव चतुर्दशकरणात्मकचतुर्दशारचक्रदेवतात्मना स्थिता इत्यर्थः । संध्यायाः सवर्णं सदृशं वसनं वस्त्रं यासां ताः, संप्रदाययोगिन्यः आदिशक्तिमयत्वेन सत्संप्रदायवेद्याः सर्वसंक्षोभिणीप्रभृतयः, संचिन्त्याः सम्यक् भावनीयाः ॥ ४३ ॥

अव्यक्तमहदहंकृति-
तन्मात्राभीष्टविकृताङ्गनाकाराः ।
द्विरदच्छदनसरोजे
जयन्ति गुप्ततरयोगिनीसंज्ञाः ॥ ४४ ॥

अव्यक्तम् अव्यक्ताख्यं तत्त्वं, महत्तत्त्वम्, अहंकृतिः अहंकारतत्त्वं, तन्मात्राः पृथिव्यादिभूततन्मात्राः पञ्च, संहत्य तु अष्ट, एतैरभीष्टं स्वीकृतमाकारं स्वरूपं यासां ताः – देव्यात्मिका इत्यर्थः, । गुप्ततरयोगिनीसंज्ञाः भूतदेव्या अत्यन्तान्त-

रङ्गभूतत्वात् एतासामनङ्गकुसुमादीनां गुप्ततरेति संज्ञा । द्विरदच्छदनसरोजे सर्वसंक्षोभणाख्याष्टदलपद्मे, जयन्ति सर्वोत्कर्षेण वर्तन्ते ॥ ४४ ॥

भूतानीन्द्रियदशकं
मनश्च देव्या विकारषोडशकम् ।
कामाकर्षिण्यादि-
स्वरूपतः षोडशारमध्यास्ते ॥ ४५ ॥

भूतानि पृथिव्यादीनि, इन्द्रियदशकं, मनश्च, षोडशारं–सर्वाशापरिपूरकनामधेयं चक्रं, कामाकर्षण्यादिस्वरूपतः–कामाकर्षिण्यादिषोडशशक्त्याकारेण, अध्यास्ते अधितिष्ठति । सर्वाशापरिपूरके चक्रे एताः कामाकर्षण्यादिगुप्तयोगिन्यः सर्वात्मिका निवसन्ति इत्यर्थः ॥ ४५ ॥

मुद्रास्त्रिखण्डया सह
संविन्मय्यः समुच्छ्रिताः सर्वाः ।
आदिमहीगृहवासा
भासा बालार्ककान्तिभिः सदृशाः ॥४६॥

आधारनवकस्था
नवचक्रत्वेन परिणतिं याताः ।
नवनाथशक्तयोऽपि च
मुद्राकारेण ताश्चक्रे ॥ ४७ ॥

त्रिखण्डया सह त्रिखण्डाख्यमुद्रया सार्कं, समुच्छ्रिताः सम्यक् उच्छ्रिताः–सर्वोत्कर्षेण वर्तमानाः, आदिमहीगृहवासाः–आदिमचतुरश्रनिलयाः, भासा कान्त्या, बालार्ककान्तिभिः तरुणारुणत्विभिः, सदृशाः तुल्याः, संविन्मय्यः चिद्घननिष्ठा इत्यर्थः । एतास्तु मुद्राः चतुरश्रादिबैन्दवान्तनवचक्राधिष्ठाननायिका इति परमशिवेन प्रपञ्चिताः । एतदेव विवृणोति आधारेत्यादि, आधारनवकं–मूलाधार-स्वाधिष्ठान-मणिपूरकानाहत-भ्रूमध्य-विशुद्धि-लम्बिकाज्ञा-विन्दुरूपं यस्या उपासकरूपिण्याः संबन्धि, येन हेतुना नवचक्रत्वेन बैन्दवात्मना परिणतेन आकारेण, नवनाथशक्तयः नवमुद्राकारेण, परिणता जाता इत्यर्थः ॥ ४६ ॥ ४७ ॥

---

*मोचयन्ति ग्रहादिभ्यः पाशौघान्द्रावयन्ति च ।
मोचनं द्रावणं यस्मान्मुद्रास्ताः परिकीर्तिताः ॥

अस्यास्त्वगादिसप्तक-

माकारश्चैवमष्टकं स्पष्टम् ।

ब्राह्म्यादिमातृरूपं

मध्यमभूबिम्बमेतदध्यास्ते ॥ ४८ ॥

अस्या देव्याः, त्वगादिसप्तकं – त्वगादिसप्तधातवः, आकारः स्वरूपं च, एवं-रूपमष्टकं – ब्राह्म्यादिमातृरूपं – ब्राह्म्याद्यष्टशक्तिस्वरूपं दधत् , मध्यमचतुरश्रे निवसति इत्यर्थः ॥ ४८ ॥

अणिमादिभूतयोऽस्याः

स्वीकृतकमनीयकामिनीरूपाः ।

विद्यान्तरगुणभावेन

फलभूता भूनिकेतनगाः ॥ ४९ ॥

अस्याः परमेश्वर्याः, अणिमाद्यष्टशक्तयः, विद्यान्तराणां हठयोगादीनां स्वीकृतानि कमनीयानि मनोहराणि कामिनी-रूपाणि याभिस्ताः एवं-भूताः । गुणभावेन उपसर्जनीभावेन, भूनिकेतनगाः – सर्वान्तचतुरश्रे तिष्ठन्ति इत्यर्थः ॥ ४९ ॥

इत उत्तरं गुरुक्रमो गदितः इत्यन्तेन श्लोक[illegible]ष्केण परम-शिवान्तगुरुमन्त्रं शिष्यानुजिघृक्षया प्रतिपादयितु[illegible]क्रमते

परमानन्दानुभवः

परमगुरुनिर्विशेषबिन्द्वात्मा ।

स पुनः क्रमेणाभिन्नः

कामेशत्वं ययौ चिद्विमर्शरूपम् ॥ ५० ॥

परमः सर्वोत्कृष्टः, आनन्दः परिपूर्णाहंभावरूपोऽनुभवः ज्ञानं यस्य, परमगुरुरित्यादि – परमगुरुरादिनाथः परमशिवः, तस्मात् [illegible] निर्विशेषः अभिन्नो, बिन्दुः पूर्वोक्तकामकलारूपः [illegible] स्वरूपं यस्य, ...

....

....

आसीनः [illegible]पीठे

कृतयुग[illegible] गुरुः शिवो विद्याम् ।

तस्यै ददौ स्वक्षौ[illegible]

कामेश्वर्यै विमर्शरूपिण्यै ॥ ५१ ॥

4

सापीशा मित्रेश-

मुख्यान्स्वांशाञ्ज्येष्ठमध्यमालाख्यान् ।

चित्प्राणविषयरूपां-

स्त्रेतादियुगादिकारणत्रिगुरून् ॥ ५२ ॥

बीजत्रितयाधिपतीन्

परीक्ष्य विद्यां प्रकाशयामास ।

एतैरोघत्रितयम्

अनुग्रहीतुं गुरुक्रमो गदितः ॥ ५३ ॥

उदितः पुण्यानन्दा-

दिति कामकलाङ्गनाविलासोऽयम् ।

परमशिवभुजङ्गपाशा-

कर्षितचित्ताय कल्पते नित्यम् ॥ ५४ ॥

चित्तान्तरङ्गचपल-

तृष्णासलिलप्रपञ्चवाराशेः ।

यदनुग्रहेण तीर्ण-

स्तस्मै श्रीनाथनाविकाय नमः ॥ ५५ ॥

....

....

....

इति श्रीपुण्यानन्दयतिविरचितः कामकलाविलासः समाप्तः ॥

सद्विद्यानां संश्रये ग्रन्थवृन्दे

व्यूहे ह्रासं कालवृत्त्योपयाते ।

तत्तत्सद्धर्मोद्दिधीर्षैकतान-

सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-

र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विविच्य ।

प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-

ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

45776
NOT FOR ISSUE

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेपः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्-
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

॥ तिलकम् ॥

श्रीशिवार्पणमस्तु ॥

शुभमस्तु साधकपाठकश्रोतृणाम् ॥

साधनामार्गेषु श्रीगुरुरेव साधकानां सहायः, शरणम् सुहृत् ।

भारं कर्मार्पितमतिगुरुं धीरतादि प्रवृद्धं
मग्नामुर्वीमिव पयसि यो लीलयाऽप्युद्दिधीर्षुः
धत्ते बीजं श्रुतिपथचरं वर्चसे चात्ममन्थं
क्लेशव्यूहाच्छिदुरुमरवभृच्च श्रीगुरुः पञ्चमूर्तिः

ॐ नमः श्रीगुरुचरणकमलेभ्यः

(All rights reserved)

Published by
Paṇḍit Jagaddhara Zādoo Shastri,
for the Research Department,
Jammu & Kashmir Government
Srinagar.

सर्वपीठनिवासिन्यः सर्वगाश्चिन्मरीचयः
भैरव्यो भरिताकारा रक्षन्तु कुलभास्करः

[illegible] शास्त्री
8.6.88

सा काली निरुपाधि शुद्धनिलये शान्ते नरीनृत्यते
कैवल्यं विदधाति निर्गुणतया द्वैतं भरी भृज्यते
ब्रह्मास्मीत्यवबोधखड्गमहसा मिथ्याजनीनप्रत्यया-
भासे ब्रह्मणि सर्वमेव दधती चेच्छिद्यमाना स्वयम् ॥

कश्मीर–संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६८

श्रीपरात्रीशिका

महामहेश्वराचार्यवर्य्य–श्रीमदभिनवगुप्तपादकृत
अनुत्तरतत्त्वविमर्शिन्यपराख्यलघुवृत्त्युपेता ।

साच

श्रीराजराजेश्वर–महाराजाधिराज–कश्मीरनरन्द्रे–
श्रीहरिसिंहजी–बहादुराज्ञया।

रिसर्चकार्यालयाध्यक्ष–पण्डितजगद्धरजाडूशास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संशोधनादिसंस्करणोत्तरं
संपाद्य
श्रीनगरे 'मर्कण्टाइल' नाम्नि मुद्रणालये मुद्रापयित्वा
प्राकाश्यमुपनीतम् ।

संवत् २००४ कश्मीर–श्रीनगर खैस्ताब्दः १९४७

(अस्य ग्रन्थस्य मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः
स्वायत्तीकृताः सन्ति)

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन् सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत् सर्ववन्द्यत्वमाप ॥१॥
तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

PREFACE.

The Parātrīśikā with two commentaries called 'Laghuvritti' and 'Vivriti' by Abhinavagupta and Rājānaka Lakshmī Rāma respectively are printed separately as Nos: LXVIII and LXIX of the present series. The following manuscript-material has been utilised in preparing the same.

LAGHU VRITTI

A Devanāgarī manuscript on modern paper belonging to Rajanaka Lakshman Joo Brahmachari of Srinagar. It consists of 29 leaves with 20 lines per page. Letters per line 25. size 11" × 9" Almost correct.

VIVRITI.

क. A modern copy of the Research Department. Script Sarada of recent origion. Number of leaves 13 with 18 lines on an average per page, each line having 16 letters. Size $6\frac{1}{2}'' \times \frac{1}{2}''$. This manuscript happens to be abounding in spelling mistakes and omissions.

ख. A country-paper manuscript belonging to Dr. Shiv Nath Sastri, Ācharya, D.O.C., etc., of this Department. Script Śārada. Contains leaves 20. Lines per page 14 with 23 letters in a line; size $8'' \times 6''$. Almost correct. Date 1949 Vikrami.

The Parātriśikā with Abhinavagupta's commentary is an important work dealing with some of the fundamental doctrines of the Trika School. Even so the manuscripts of this work have become so rare in Kashmir that all our enquiry for a birch bark or paper manuscript could give us no information of any other copy except the manuscript kindly supplied by Rājānaka Lakshmaṇa.

We are indebted to Rājānaka Lakshmana Brahmachārī and Dr. Shiv Nath Sharma, Shastri, Āchārya, D.O.C., etc., for their courtesy in lending their manuscripts of the Laghuvritti and Vivriti respectively for publication to this Department. It is hoped that both these gentlemen will enrich our series in future also by the rarities they possess.

The Editor.

PARATRIŚIKA

INTRODUCTION

The Trika manual entitled Pāratriśika, with two commentaries, is being presented in the following pages as Nos: LXVIII and LXIX of the Kashmir Series of Texts and Studies. The text forms a fraction of the Rudrayāmala which is one of the most authoritative and extensive Tāntric works. This work on account of giving the whole Tantra in summary has enjoyed a great popularity as is clearly borne out by the fact that it has attracted the attention of great authors like Somānanda, Abhinavagupta and others. It is a very early handbook and therefore of high authority to be quoted in discussions on the general character of the teaching of Trika and has, as such, long been the subject of study. This Āgama has been variously named as 1 Parātrimśika, 2 Parātriśikā, 3 Trikasūtra, 4 Trikāgama, 5 Anuttrasūtra, and together with the vivarana of Abhinavagupta it is called 6 Anuttaraprakriyā.

---

१. 'त्रिशिकेत्यपि गुरवः पठन्ति , Vivaraṇa page 17.

२. 'अभिधेयं त्रीशिकेति', Vivaraṇa page 16.

३. 'श्रीत्रिकसूत्र इति त्रिकप्रमेयसूचिकायां श्रीपरात्रीशिकायामित्यर्थः', Tantrāloka – viveka

४. 'यथा वा इहैव श्रीत्रिकागमेषु',Vivaraṇa, page 119.

५. 'त्रिशिका च अनुत्तरसूत्रम्', .

६. 'अनुत्तरप्रक्रियायामिति श्रीपरात्रीशिकाविवरणादौ'. Tantrāloka - viveka ix 313.

The investigations that the master-minds of mediaeval Kashmir have carried on in elucidating the Trika system of philosophy have resulted in a large number of commentaries on the Tantras and philosophical treatises. Works having a great bearing on this system have often been commented upon in two separate commentaries by one and the same author. Utpaladeva has exposed his Pratyabhijñā kārikas in two commentaries - Vritti and Vivriti. Similarly Abhinavagupta, the main exponent of this system, has penned down two commentaries named Vivaraṇa and Laghuvritti on the Parātriśika. In Vivaraṇa *i. e.* the detailed commentary, Abhinavagupta has discussed the abstruse problem of Parā, Paśyanti, Madhyamā, Vaikharī and other allied topics in the lofty and pregnant language. The commentary bears ample testimony to the manysidedness and the encyclopedic nature of this learning. In order to meet the needs of average reader, the great Acharya has epitomized his Vivaraṇa in the present commentary and for this very reason it is called "Laghuvritti". This commentary is less terse but not more elaborate. Manifold interpretation as offered in the Vivarana, has throughout been avoided and as such renders great help in understanding the text. The work attributed to Abinavagupta under the name Anuttara-tattva-vimarśinī, is no other than the present Laghuvritti.

It is hardly neeessary in this context to go into an elaborate investigation to prove that the present commentary is an epitome of the bigger Commentray i. e. Vivaraṇa, as Abhinavagupta has actually composed such gists of his encyclopædic works for average reader. In his Tantrasāra which is an aridgment of the Tantraloka, he says:

विततस्तन्त्रालोको विगाहितुं नैव शक्यते सर्वैः ।
ऋजुवचनविरचितमिदं तन्त्रसारं ततः श्रृणुत ॥ २ ॥

One more reference in support of the above statement may be given here. Ishwara-partyabijña vimarsina is an obridgment of the Īśvarapratyabhijnā-vivriti-vimarśini by the present author. The main cause for epitomozing the detailed commentary is given by Bhāskara, who says:

'ततः सर्वजनहितार्थं श्रीमताभिनवगुप्ताचार्येण बृहत्प्रत्यभिज्ञाख्या बहुविस्तरा टीका कृता । तद्विचारणे च जनमशक्तं ज्ञात्वा तेनैव प्रत्यभिज्ञाकारिकासूत्रेषु सङ्ग्रहमयी विमर्शिनीति प्रसिद्धा टीका कृता'

(Bhāskari, Vol. I. P. 3)

There is sufficient internal evidence available in the Vivaraṇa to prove that the author has based his exposition on the Vivriti of Somānanda, as he explicitly says:

(1) तद्ग्रन्थिनिर्दलनार्थं एवायमस्माकं तच्छासनपवित्रितानां यत्नः (Page 16 Vivaraṇa)

(2) श्रीसोमानन्दमतं विमृश्य मया निबद्धमिदम् ।

(Vivaraṇa Page 282)

On the other hand the present commentary is based on the Tantrasāra of Utpaladeva as is

distinctly stated in the introductory verses:

श्रीमदुत्पलदेवीयं तन्त्रसारं तु वर्ण्यते ॥ २ ॥

It would naturally be expected that reference from the Tantrasāra of Utpaladeva could be found in the same way as quotations are available in the Vivaraṇa from the Vivritti of Somananda at pages 16, 52, 59, 63, 90 and 207. But no such quotations are forthcoming. Lines from the Tantrasāra have been quoted in the Vivaraṇa. But this work is of Āgamic nature, and therefore cannot have been written by Utpala. This raises a great doubt about the interpretation of the above mentioned line that the present commentary is an amplification of the tenets as laid down by Utpaladeva in his treatises. Whether we would be warranted in actually regarding the Tantrasāra as an independent work by Utpaladeva may be left over for future investigation.

Abinavagupta in this encyclopaedic work Tantraloka makes a specific reference to some authors namely Somananda, Kalyaṇa and Bhavabhuti who also have commented upon the present text. He refers with reverence to them in the following stanza:

श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः ।
तथाहि श्रीशिवाशास्त्रविवृतौ तेऽभ्यधुर्बुधाः ॥

(Tantraloka. – XIII. 149.)

Mahesvarananda frequently quotes lines with slight variations from the present work to back up his statements in his Parimala a commentary on the Mahārtha-manjarī. These quotations are being noted here for comparison and ready reference:

PARIMALA	LAGHUVRITTI
1. Page, 8 : सदाभिनवगुप्तं यत् पुराणं च प्रसिद्धिमत् । हृदयं तत् परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम ॥	Page, 1.
2. Page, 169 : श्रीदेव्युवाचेत्यादौ स्वा- त्मदेवतैव प्रबुध्यमाना- वस्थायामात्मानं पराम- र्शेनानवरतं पृच्छति '	Page, 1
3. Page, 54 : पुरुषस्य हि संवेद्यरूपस्यैव परिमितस्य वेद्यराशौ गणनम '	Page, 6
4. Page, 174 : एतद्यो लभते स लाभ- काल एव न पशुः ।	Page, 10.
5. Page, 174 : अभ्यासेन विनापि जीवन्मुक्तता परा कौलिकीसिद्धिः ।	Page, 10.
6. Page, 118 : पुष्पैर्हृदयान्तःस्वरूपस- मर्पणादेव हृदयस्य पोषकैर्बाह्याभ्यन्तरैः सर्वैर्द्रव्यैः '	Page, 22.

Abhinavagupta's date is too well known to require any discussion here. He flourished between the latter part of the 10th and the 1st quarter of the 11th century of the Christian era.

Following is the list of works composed by Abhinavagupta which have either been printed or known from references in his existing works.

1. Bodha - panchadaśika.
2. Malinīvijaya - vārtika.
3. Parātrimśika - vivriti.
4. Tantrāloka.
5. Tantrasāra.
6. Tantravatāvadhānikā.
7. Dhvnyāloka - lochana.
8. Abhinava - bhāratī.
9. Bhagavadgītārtha - Sangraha.
10. Paramārtha - sāra.
11. Iśvarapratyabhijnā - vivriti - vimarśinī.
12. Iśvarapratyabhijnā - vimarśini.
13. Kramastotra.
14. Dehastha - devatā - chakra - stotra.
15. Bhairava - stotra.
16. Paramartha - dvadaśikā.
17. Paramartha - charcha.
18. Mahopadeśa - vimśatikā.
19. Anuttarashṭikā.
20. Anubhava - nivedana.
21. Ghatakarpara - kāvya - viviti.
22. Krama - keli.
23. Śivadrishtyālochana.
24. Srīpurva - panchika.
25. Padārthapraveśa - nirnaya - tīka
26. Prakīrṇaka - vivarana.
27. Prakaraṇa - vivarana
28. Kāvyakautuka - vivarana.
29. Kathāmukha - tilaka.
30. Laghvi - prakriyā.
31. Bhedevada - vidaraṇa.

32. Devīstotra - vivarana.
33. Tattvādhvau - Prakaśikā.
34. Sivaśaktyavinabhāva - stotra.
35. Anuttara - tattva - vimarśinī (Laghu-vritti)
36. Raurava - vichāra.
37. Rahasya-panchadaśikā.

Rājānaka Lakshmī Rama alias Lasa Kāka has also composed a breifer and simpler commentary on the Parātriśika which is printed along with this volume as No: LXIX of the present Series. His date Śaka 1732 is known from a verse at the end of his commentary, on the Bhagavadgīta, styled Tattva-prakāśika:

लक्ष्मीराम इति द्विजोऽत्र निवसन् कश्मीरभूमण्डले
मेरांमातुरुपात्तदेहजननो राजानगोपालकात् ।
श्रीशाके द्विगुणाद्रिभूपरिमिते मासे तथैवाश्विने
शुक्लायां प्रतिपद्यजाङ्घ्रिनिरतो गीतासु टीकां व्यधात् ।

J. D. Zadoo.

Board of Editors.

1. J. D. Zadoo, Shastri, M.A.M.O.L, H.H.
2. Dr. S. N. Sharma, Shastri, Acharya, D.O.C., etc.
3. Pt. Sri Kanth Shastri, B.A., H.H.

परात्रीशिकालघुवृत्तिः ।

महामाहेश्वराचार्यवर्य–श्रीमदभिनवगुप्तरचिता ।

यत्र तेजांसि तेजांसि तमांसि च तमस्यलम् ।
तेजांसि च तमांस्येतद्वन्दे ज्योतिरनुत्तरम् ॥ १ ॥
सदागमप्रवाहेषु बहुधा व्याकृतं त्रिकम् ।
श्रीमदुत्पलदेवीयं तन्त्रसारं तु वर्ण्यते ॥ २ ॥
सदाभिनवगुप्तं यत्पुराणं च प्रसिद्धिमत् ।
हृदयं तत्परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ॥ ३ ॥

तत्र स्वात्मदेवतैव प्रबुध्यमानावस्थायां स्वात्मानं परामर्शांशेनावतरन्तं पृच्छति । तत उच्यते "श्रीदेव्युवाच" इति । किं पृच्छति ? तदाह–

अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदम् ।
येन विज्ञातमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥

हे स्वात्मरूप देव सर्वत्र ज्ञाने करणे च प्रथमम-भिमुखीभूत, तत्र तावदनुत्तरं रूपम् उत्तरम् उत्कृष्टमुपरिवर्ति, तच्च जडापेक्षया ग्राहकरूपम् । तस्य तु चिदात्मनः स्वप्रकाशस्य न ग्राहकान्तरमस्तीति अनुत्तरत्वम् ।

तेन अनुत्तरं संविद्रूपं सदा सर्वत्रावभासितं पूर्वा[illegible] कालविहीनमनपह्नवनीयम्, किं तत्रोच्यताम् । इदं तु [illegible] च्यते तत्किल कथं केन प्रकारेण कौलिकस्य कुल[illegible] देहात्तभुवनादेः अपूर्वरूपस्य स्वतः स्वतन्त्रतः सिद्धिं [illegible] न्द्रियसंवेद्यतया अभिव्यक्तिं ददाति; 'दा दाने' '[illegible] ने' इति च धातुगत्या सृजति संहरति चेत्यर्थः । अनुत्तरं चिदेकरूपं सत् कथं नवनवेन अत एव [illegible] ज्येन वेद्यवेदनवेदकादिभेदेन भातीत्यर्थः । ननु [illegible] ज्ञातेनानेन प्रकारेण ज्ञातमात्रेण खेचरी बोधभूमि[illegible] सती इयं संविच्छक्तिः [1]समताम् अविकल्पत्वं पू[illegible] त्मनो व्रजेत् गच्छेज्जानीयात् । [2]तत्प्रकारापरिज्ञाने तु न [illegible] अबोधरूपे वेद्यांशे संचरणात् । तत एव वेद्यैः [illegible] भिर्नियन्त्रितेति न पूर्णशक्तिः । किंच धारणादि[illegible] प्रयोगादिकृताः सिद्धयः सन्ति अनुत्तरं संविन्मात्र[illegible] कथं कौलिकसिद्धिं सक्रमां ददाति येन ज्ञातमात्रेण [illegible] रूपत्वं व्रजेत् ॥ १ ॥

एतद् गुह्यं महागुह्यं कथय स्व मम प्रभो ।
हृदयस्था तु या शक्तिः कौलिनी कुलनायिका ॥ [illegible]
तां मे कथय देवेश येन तृप्तिं व्रजाम्यहम् ।

एतद्प्रकटमतिशयेन महत् उत्कृष्टमगुह्यं स्वप्रका[illegible] भवति तथा कृत्वा प्रभो [3]आच्छादने स्वरूपस्य [illegible] च प्रभवनशील हे स्व स्वात्मन् मम पृच्छन्त्याः [illegible]

[1] [illegible]तामिति पाठान्तरम् । २ तत्प्रकारेऽपरिज्ञाते तु इति पाठा[illegible]
३ [illegible]प्रकटनेनाच्छादनैकरूप, प्रकटनेन च [illegible] [illegible]ति पाठान्तरम् ।

कथय विमर्शपदवीं [1]वाक्यप्रबन्धपर्यन्ततामानय । ननु ग्राहकरूपं सर्वस्य हृदये स्फुरति तत्र किं प्रश्नेन । [2]सत्यं, स्फुरितमपि न तत्त्वतो हृदयङ्गमीभूतम् । हृदयङ्गमीभावेन विना भातमप्यभातमेव रथ्यागमने तृणपर्णादिवत् । हृदयङ्गमतावगमनसाध्या हि तृप्तिर्जीवन्मुक्तता, तत्समावेशसाध्या हि तृप्तिर्विभूतिरूपेति द्विविधा तृप्तिः परामर्शेन विना न भवतीति युक्त एव प्रश्नः । तदेव दर्शयति हृदयस्था हृदये संविद्रूपे स्थिता या स्वातन्त्र्यलक्षणा शक्तिर्यस्याः कुलं ग्राह्यग्राहकग्रहणचक्रं निर्मेयत्वेन प्रयोजनं तत एव कौलिनी । तस्य निर्मितस्य कुलस्य नायिका सा अधिष्ठात्री, तद्वेदनेन तदवभासनकर्त्री च तत्स्वरूपसंहर्त्री च । तां मे कथय परामर्शपदवीं नय । येन परामृश्यतानयेनन तृप्तिं भुक्तिमुक्तिरूपां व्रजाम्यहमिति संवेदनरूपां कथयेति णिचौ । एवं प्रबुध्यमानरूपा संवित् यदा प्रश्नं निर्भृतावभासमानपरमार्थस्वरूपं करोति, तदा प्रबुद्धावस्थाप्रतिपत्तौ सैव पूर्णरूपा भैरवदेवतात्मिका प्रतिवचनदात्री संपद्यते । नच [3]अत्र ऐदंप्राथमिकत्वं कदाचित् अपितु पुरातनमेव तत्परमावर्तमानं कालभेदकल्पनया भातीति भूतत्वेन व्यवह्रियते ॥ २ ॥

[4]दिव्यरूपत्वेन प्रत्यक्षाभावात्परोक्षेण तदेतदुच्यते

श्रीभैरव उवाच ।

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरम् ॥ ३ ॥
कथयामि न सन्देहः सद्यः कौलिकसिद्धिदम् ।

[1] वाक्यजन्यपर्यन्ततामिति पाठान्तरम् । २ सत्यं स्फुरतीति पाठान्तरम् । ३ न चात्रेच्छां प्राथमिकीं काचिदिलपि पाठः । ४ वेद्यत्वेन चे[illegible]पि पाठः ।

कौलिकोऽयं विधिर्देवि मम हृद्व्योम्न्यवस्थितः ॥४॥

[1]महान् भागः प्रबुद्धत्वावस्थायामुज्जिगमिषालक्षणा यस्याः सा त्वमेवंभूता शृणु स्फुटमवधारय । [2]अहमुत्तरस्यापि ग्राहकस्यापि यदनुत्तरं रूपम् । अपिशब्दाद् ग्राह्यग्रहणादेरपि । कौलिकसिद्धिदं [3]विश्वावभासनादिभोगापवर्गदातृप्रयोजनं । तत्कथयामि तच्च हृदयङ्गमतां नयामि । यथा सद्य एव अवधारणमात्रे संपन्ने एव पुनरत्र सन्देहो न भवति । यस्मात् अयमिति भासमानो यः कौलिको विधिः स मम हृदयाकाशे हृदयत्वेन सदा विदितः सन् चिदात्मतया तावदास्ते ।

“सदेव सौम्येदमग्र’… ‘एकमेवाद्वितीयं’… ‘तदैक्षत”
इत्यादिश्रुतेः ॥ ४ ॥

ततश्च

अथाद्यास्तिथयः सर्वाः स्वरा बिन्द्ववसानकाः ।
तदन्तः कालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥ ५ ॥
पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु ।
क्रमात्कादिषु वर्गेषु मकारान्तेषु सुव्रते ॥ ६ ॥
वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम् ।
तदूर्ध्वे शादि विख्यातं पुरस्ताद् ब्रह्मपञ्चकम् ॥७॥
अमूला तत्क्रमा ज्ञेया क्षान्ता सृष्टिरुदाहृता ।
सर्वेषां चैव मन्त्राणां विद्यानां च यशस्विनि ॥ ८ ॥

---

१ महानुभवैकप्रबुद्धेति पाठान्तरम् । २ यतोऽहमुत्तरस्येति पाठान्तरम् । ३ विश्वावभासकादिभोगेति पाठान्तरम् ।

इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा ।

इह पदार्थप्रकाशनमेव तावत् संवेदनं प्रसिद्धम्, पदार्थश्च ज्ञातृवेद्यस्वभावः, तत्र ज्ञातृता नाम उन्मेषनिमेषलक्षणेन संकोचविकासात्मज्ञानक्रियालक्षणेन स्वभावेन स्वपरिस्पन्दनसारा नतु परिनिष्ठिता । परिच्छिन्नजडरूपघटादितुल्यस्य च संकोचविकासयोगः कथम् । त्रिकोणं हृदयस्पन्दनादिषु यथायथा स्फुटीभवति तथातथा ज्ञातृत्वमुत्कृष्यते । [1]या बहिरिव संविदि यथायथा न्यूनीभवति, तथातथा तन्निकृष्यते । यावज्जडपाषाणादौ स्वयं संकोचविकासलक्षणो विसर्गः स्वातन्त्र्यात्मा भगवतोऽनुत्तरस्य शक्तिः । तेन भैरवसंघट्टविभ्रमणोदयपरमार्थशिवशक्तिस्वरूपं हृदयकमलमुच्यते । संकोचविकासयोगे एव मध्ये अनुत्तरः, आनन्दः, इच्छा, ईशना, उन्मेषः, ऊनता, इच्छेशनयोरस्फुटस्फुटत्वेयोल्लासः ऋ ॠ ऌ ॡ भवति, तयोरिच्छेशनयोरनुत्तरानन्दाभ्यां सन्धीयमानत्वात् ए ऐ, उन्मेषोनतयोस्ताभ्यामेव तथाकृतत्वात् ओ औ इति भवति, तदनन्तरं वेद्यजातस्य वेदकात्मकबिन्दुस्वरूपसंस्कारशेषत्वमित्यनेन रूपेण परिपूर्णो[2] भवति, इत्येवं पूर्णानन्दचिद्रूप[3]विसर्गशक्तिमयं परभैरवयामलम् । तत्र विसर्गरूपता सामान्याकारा विशेषेषु पञ्चदशस्विति पृथग् गणनार्हा न भवति । एवं कौलिको विधिर्मम तावद् हृदि संविद्रूपतादात्म्येनावस्थितः । अथानन्तर[4]मिदंपरामर्शमहिम्ना प्रसरन्ति ये अकाराद्या बिन्दुपर्यन्ताः

---

१ ज्ञातृतेत्यर्थः । २ पूर्णो भवतीत्यपि पाठः । ३ विसर्गशक्तिमयपरभैरवेति पाठान्तरम् । ४ इदमिति पदं नास्ति क. पुस्तके ।

स्वराः, त एव परमानन्दरूपस्य स्थितिं पूरयन्तीति तिथय उक्ताः । एवं सा बोधचन्द्रस्य प्रकाशानन्दमयस्यानुत्तरस्य विमर्शशक्तिः पञ्चदशभिस्तिथिभिः पूर्यते । ते चैते सर्वे स्वराः शब्दनस्वरूपाः [1]परमार्थात्मानो जगदपेक्षया स्वयं राजन्तः स्वप्रकाशाः तेषामन्तः सोमसूर्यौ संकोचविकासौ तदात्मा तेषां तदन्तः तेषामन्तः बिन्दुद्वयात्मा विसर्ग इति यावत् । ततः सर्वेष्वेतेषु कालेन संकलनात्मना परामर्शनयोगः । ततो हेतोः । परामर्शो हि स्पन्दनात्मैव, नतु परिनिष्ठिताचलजडरूपः । बहिरपि च सोमसूर्यौ रात्रिदिवससंकोचविकासरूपेण तिथिपञ्चदशकस्य अन्तः [2]चरतः इति । इयं सा भगवती परामर्शशक्तिः । यश्च असाविच्छायामीशने च वेद्योल्लासः स एव पृथग्भवन् स्थूलतया भूतपञ्चकात्मा सूक्ष्मत्वेन च तन्मात्रपञ्चकात्मेति दश तत्त्वानि, पृथिवी जलं तेजोवायुराकाशः गन्धो रसो रूपं स्पर्शः शब्द इति । स एव वेद्योल्लासः करणतया सृज्यमानानीन्द्रियाणि तत्तत्क्रियाशक्तिप्रधानानि उपस्थपायुपादपाणिवागादीनि कर्मेन्द्रियाणि [3]ज्ञानशक्तिप्रधानानि बुद्धीन्द्रियाणि घ्राणरसनाचक्षुस्त्वक्श्रोत्रमिति । ततो वेद्यतायाः क्रमेण संसारे वेदनाभसस्योल्लासे मनोऽहंकारः बुद्धिः प्रधानं पुरुषः । तथा पृथिव्यादीनि पुरुषान्तानि कादिषु मान्तेष्विति । पुरुषस्य च [4]संवेद्यरूपस्यैवोपरि मान्तस्य वेद्यराशौ गणनम् । तेन हि विना पृथिव्यादि वेद्यं कथं भवेत् । [5]तेन वेद्याभासस्यैवेयद्रूपं यद्वेद्यराशेरेव अत्यक्तवेद्यभावस्य भिन्न-

१ परमार्थात्मनो इति पाठान्तरम् । २ तिथिपञ्चदशकस्यान्तः चरन्तः इति पाठान्तरम् । ३ ज्ञानशक्तिप्राधान्यानीति पाठान्तरम् । ४ संवेद्यरूपस्यैवोपरिमान्तस्येत्यपि पाठः । ५ न वेद्याभासस्यैवेदं रूपमिति पाठान्तरम् ।

वेद्यवेदकैकीकरणम् । तद्व्यावृत्तानि तत्त्वानि । कला वायुरूपा किंचित्कर्तृत्वेन प्रेरिका । अशुद्धविद्या तेजोरूपा किंचिज्ज्ञत्वेन प्रकाशिका च । माया सलिलरूपा अभिष्वङ्गरूपनिमज्जनात्मकस्तम्भनस्वभावा । इन्द्रोपलक्षिता पृथिवीरूपा रागशक्तिः । ता एताश्चतस्रः शक्तयः पुरुषं धारयन्ति मध्ये त्रिशङ्कुवद्[1]विश्रमयन्ति, अन्यथा पाषाणादिवत् जडभूमिमेवापतेत्परमेश्वरवद्वा संविद्गगनमेवापतेत् । उभयथापि मायाप्रमातृताभावे वेद्यमपि न किंचिदिति, संकोचविकासावपि न कौचित्, संकोचेन विना [2]विकासस्याप्ययोगात् । तद्विसर्गरूपेण संकोचविकासात्मना इदं सर्वमाक्षिप्तं । अत्र [3]वेद्यसृष्टिः समुचि(दि)तवेदकसृष्टिश्चेति । आकाशशङ्कया[4] तु नात्र मायाप्रमातृताधीनं प्रयोजनमस्ति । सा हि अन्तर्लीना पुरुषस्य [5]वेद्यशून्यतया वेद्यावकाशसहिष्णुतया च [6]प्रमातृत्वात् तदीया नित्या विमर्शशक्तिः । यदा तु वेद्यतायाः क्रमेण प्रच्छादनं संविद्रूपस्य च प्रथनं, तत्र तावत् धृतिः, तद्रूपस्यैव आप्यायनं, तत्प्रकाशयोगः । तत्रैव परमस्वातन्त्र्यलाभात्मकं स्पन्दनं सर्वत्र तेनैव रूपेण व्याप्तम् । इत्येतद् बृंहकं स्वरूपस्य पूरकं व्यापकं पञ्चकं शादीनां विद्येश्वरसदाशिवशक्तिशिवलक्षणं सूक्ष्मपृथिव्यप्तेजोवाय्वाकाशरूपं, सद्योजातवामदेवाघोरतत्पुरुषेशानरूपं ब्रह्मपञ्चकशब्देनाख्यातमिति । एवमसौ [7]परापररूपा [8]विसर्गशक्तिः । तथाभूतश्च [9]पञ्चकरूपं पुनरप्यनुत्तरविश्रान्तम् । तदेवं [10]विसर्गशक्तिरेव "अथाद्या"

१ विश्रामयन्तीति पाठान्तरम् । २ विकासस्याप्यभावादिति पाठान्तरम् । ३ वेद्यसृष्टिश्चेति इति पाठान्तरम् । ४ आकाशशक्त्यात्मेति पाठान्तरम् । वेद्यत्वेति पाठान्तरम् । ६ प्रमातृरूपत्वादिति पाठान्तरम् । ७ श्रीपरापररूपेति पाठान्तरम् । ८ विमर्शशक्तिः इति पाठान्तरम् । ९ भूतपञ्चकरूपमिति पाठान्तरम् । १० तथैव विमर्शशक्तिमयमित्यपि पाठः ।

इत्यादिना "ब्रह्मपञ्चकम्" इत्यन्तेनैव वपुषा विकसतीति। तदिदं शक्तिचक्रमविच्छिन्नप्रबन्धं भगवतो भैरवनाथस्य। अनुत्तरेच्छोन्मेषत्रिकोण[1]विसर्गशक्तयः एव हि पञ्चभेदवत्य[2]श्चिदानन्देच्छाज्ञानक्रियाशक्तयो वाच्यभूतपञ्चकशक्तिमय्यः इति। ततश्च सर्वमेतदविभागपरामर्शरूपं प्रथमतः, ततो विभागपरामर्शात्मना पञ्चाशद्विमर्शरूपं परामृश्यरूपेण तु [3]कर्मतां प्राप्तं बहिस्तत्त्वजालं जायते। तस्य परामर्शात्मतैव जीवितम्। सा च मातृकारूपा। अत एव सर्वेषां मन्त्राणां गुप्तार्थभाजां [4]बीजपिण्डात्मनां चतुष्कलनवात्मादीनां पुरुषरूपवाच्याध्यवसितानाञ्च विद्यानां संवेद्यमानस्फुटार्थरूपाणां "नमःशिवाय" इत्यादिमालामन्त्राणां स्त्रीरूपवाच्याध्यवसितानां च सर्वेषामियं योनिः अविभागपरामर्शतारूपं कारणम्। सर्वेषु शिवरुद्रादिरहस्यतन्त्रेषु यत्किंचिदुच्यते तत्सर्वं इत एवोदेति। [5]यत्किल परावर[6]सिद्धिदं रूपं तत्सर्वं तत्त्वषट्त्रिंशत्यां[7] लभ्यते। तस्याश्च परामृश्यं यज्जडरूपं शरीरस्थानीयं तस्य परामर्शता जीवितं, सा च अस्यां भगवत्यामिति इत्थमेव सर्वं ददाति। अत एवेह भगवत्याः प्रष्टृरूपत्वम्। अनयैव हृदयङ्गमतया "यशस्विनि" इति [8]प्रसिद्धम्। इयता विश्वात्मरूपेण प्रसिद्धा जातेति 'यशस्विनी'त्यामन्त्रणम्। एषा च सा त्रिविधा सृष्टिरकारमूला क्षकारपर्यन्ता अनुत्तररूपा [9]प्रसूतिः पुनरपि शिवात्मन्येव[10] विश्रान्तिद्वारेण

1 विमर्शशक्त्य इति पाठान्तरम्। 2 पंचभेदवत इति पाठान्तरम्। 3 तूत्तरतां प्राप्तमिति पाठान्तरम्। 4 बीजात्मगतानामिति पाठान्तरम्। 5 यत्किंचिदिति पाठान्तरम्। 6 परासिद्धिरूपमिति पाठान्तरम्। 7 त्रिंशत्येति पाठान्तरम्। 8 प्रसिद्धमिति इति पाठान्तरम्। 9 अनुत्तररूपात्प्रभृति इति पाठान्तरम्। 10 "शिवात्मन्येवानुत्तरधाम्नि" इति पाठान्तरम्।

तत्रैवानुत्तरधाम्नि विश्रमणं यस्याः सा तथाभूता उदाहृता ज्ञेया सती[3]। अनयाभिज्ञातया तदनुत्तरस्पन्दस्वरूपं सुष्ठु ज्ञातं भवतीति यत्किल तदनुत्तरमिति यावत्। एवं हृदयस्था पूर्वमविभागपरामर्शरूपा [1]शक्तिः विभागपरामर्शतां कौलिकसिद्धिरूपतामनेनैवानुत्तररूपस्वातंत्र्येण प्रतिपद्यते इति निर्णीतं शिवरुद्ररहस्यादितन्त्रेषु ॥ ८ ॥

नन्वविभागपरा[2]मर्शे पृथग्विभागपरामर्शमूलभूते हृदयस्वरूपे [3]सति न निवृत्तः सन्देहः? इत्याशङ्क्यादिशति

चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम्।

तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥ ९ ॥

चतुर्दशेन स्वरेण परिपूर्णानुत्तरानन्दशालिना संपूर्णक्रियाशक्तिशरीरोन्मेषोनत्वसंपदा क्रियाशक्तिद्वारान्त[4]र्लीनेच्छाज्ञानयुगलेन युतं सततं मिश्रीभूतं यदिदं तृतीयं ब्रह्म सदाशिवतत्त्वा[5]त्मकं ग्राह्यराशिविलक्षणं सद्रूपं विश्वं तत् तिथीशानां– पञ्चदशानां स्वराणां [6]योऽन्तः पर्यन्तस्थितिभूतो विसर्गः तस्मिन् सम्यक् अवियोगेन अन्वितं विश्रान्तं सत् भैरवात्मनो भगवतः शब्दराशेः विश्वशरीरस्य हृदयं सारभूतम्। यथा हि सर्वतत्त्वमयशरीरस्य विभक्तत्वगादिसन्तानतन्त्रितस्य[7] तदविभागप्रकाशविमर्शविश्रान्तिधाम हृदयपदमुच्यते, तथैव भगवतो भैरवनाथस्य तदिदं विभक्ततत्त्वभुवनादिमयं विश्वरूपं परामर्शसारं पञ्चाशद्वर्णमयं शरीरं

1 शक्तिः, सा विभागेति पाठान्तरम्। 2 परामर्शस्यत्येपि पाठः। 3 सतीति पदं नास्ति क. पुस्तके। 4 तदुक्तं ["अस्मिंश्चतुर्दशे धाम्नि स्फुटीभूतत्रिशक्तिके। त्रिशूलत्वमतः प्राह शास्ता श्रीपूर्वशासने ॥ तं० लो०।"] 5 सदाशिवतत्त्वात्मकमघोरप्रकाशस्वरूपमस्फुटीभूतेदन्तात्मकग्राह्यराशिलक्षणमिति पाठान्तरम्। 6 यतो निश्चय इति पाठान्तरम्। 7 संश्रितस्येति पाठान्तरम्।

तस्य तदविभागपरामर्शसारमिदं हृदयम् । भो भगवति सुश्रोणि ! विश्रान्तपरमानन्दमयधामशक्तित्रयगतानवरतसङ्कोचविकासरूपत्रिकोणपरिस्पन्दनरूपमेतद् हृदयं भैरवात्मनो भैरवस्य आत्मभूतायास्तदविभागवत्याः श्रीपरादेव्याः [1]तत्त्वं भवति । अनुत्तररूपा संवित् तावत्, बीजात्मनो [2]प्रथमस्वरकोट्योः स्वरूपविश्रान्तिसतत्त्वयोः परिस्पन्देन तत्स्पन्दनप्रभावादेव मध्यकोटौ विभक्तपरामर्शात्मना सृष्टिरूपेण समस्ततत्त्वम[3]यीति । अत एव वक्ष्यते "सृष्टिं तु संपुटीकृत्य" इति ॥ ९ ॥

एतन्नायोगिनीजातो नारुद्रो लभते स्फुटम् ।
हृदयं देवदेवस्य सद्यो योगविमोक्षदम् ॥ १० ॥

एतत् बीजं यो लभते स लाभकाल एव न पशुः; यतोऽस्मिन् लब्धे एतत् हृदयं [4]जायते । एतद्हृदयतैव भैरवत्वम् । [5]ततो रुद्रयोगिनीयामलेन [6]यावत् न जातं शक्तिस्वरूपोन्मीलनं तावद् एतद्हृदयं[7] कथमस्योन्मीलति । अस्मिन्नुन्मीलिते सत्यऽनेन हृदयेन सहयोगः । एतद्हृदयलाभः श्रीभैरवयामलसमावेशलक्षणो जीवत एव विमोक्षद इति उन्मीलनमात्रे जीवन्मुक्ततालक्षणा परा कौलिकी सिद्धिरनुत्तरे संविन्मात्ररूपे यथा विधीयते, तथा दर्शितम् ॥ १० ॥

अधुना येन प्रकारेण अपरा अपि सिद्धयो विभूतिलक्षणाः संवित्परिस्पन्दपरामर्शबलात् प्राणनाडिकालवेलामन्त्रविद्याचर्यादिविडम्बननिरपेक्षात् भवन्ति, तं प्रकारमुपक्र-

१ एतत्तत्त्वं भवति क. पाठः । २ स्पन्देन प्रथमेति पाठन्तरम् । ३ मयैवेति पाठान्तरम् । ४ ज्ञायते इति पाठान्तरम् । ५ अथेति पाठान्तरम् । ६ योजनत इति पाठान्तरम् । ७ हृदयप्रकाशमुन्मीलनं नीलयतीति पाठान्तरम् ।

मपूर्वं दर्शयति-

अस्योच्चारे कृते सम्यङ् मन्त्रमुद्रागणो महान् ।
सद्यः सन्मुखतामेति स्वदेहावेशलक्षणम् ॥ ११ ॥
मुहूर्तं स्मरते यस्तु चुम्बके नाभिमुद्रितः ।
स बध्नाति तदा देहं मन्त्रमुद्रागणं नरः ॥ १२ ॥
अतीतानागतानर्थान् पृष्टोऽसौ कथयत्यपि ।
प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन् ॥ १३ ॥
साक्षात् पश्यत्यसन्दिग्धमाकृष्टं रुद्रशक्तिभिः ।
प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन् ॥ १४ ॥
त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः ।
वीरा वीरेश्वराः सिद्धा बलवान् शाकिनीगणः ॥ १५ ॥
आगत्य समयं दत्त्वा भैरवेण प्रचोदिताः ।
यच्छन्ति परमां सिद्धिं फलं यद्वा समीहितम् ॥ १६ ॥

एतत् संवित्तत्त्वं हृदयतां चेत् प्रतिपन्नं तदा जीवन्मुक्तेति उक्तम् । यदा तु [1]तदेव प्राणबुद्धिभूमिषु सिद्धरसविध्यमानधातुन्यायेन समावेशक्रमेणैतद्हृदयात्मकपरामर्शपात्रतापादनया प्राणबुद्ध्यादिजडिमन्यक्कारिण्या [2]प्रसरद्रूपमभ्यासदशां संपाद्यते, तदास्य स्वविमर्शावेशाभ्यासादेव नाडीप्राणादयादिशास्त्रान्तरीययोगनिरपेक्षा एव अपरा अपि सिद्धयो विभूतिरूपाः कौलिकस्य सिद्धयो जायन्ते इति तात्पर्यम् । अस्य बीजस्योच्चारे प्राणरूपतायां समावेशेन तावत्कृतमात्र एव ज्ञानक्रियाशक्तिशरीरा मन्त्रमुद्राः सद्य एव

१ परशरीरस्येति पाठान्तरम् । २ प्रहरद्वयमिति पाठान्तरम् ।

संमुखतामुच्चारयितुराभिमुख्यं प्रतिपद्यन्ते । कथम् स्वदेहावेशलक्षणं कृत्वा । तेन हि प्राणेन स्वदेहोऽप्याविश्यते । ततश्च संपूर्णज्ञानक्रियात्मक[1]हृदयरूपान्तर्लीनीकृतेन प्राणनाऽध्यधिष्ठितो देहोऽपि तद्हृदयरूपतासमाविष्टज्ञानक्रियात्मिकाभिर्मन्त्रमुद्राभिराविश्यते तावत्तावदुपक्रमो विभूतीनां मन्त्रमुद्रायत्तत्वादिति । अथ तथावेशो निरन्तरं यदि घटिकाद्वयमभ्यस्यति चुम्बके वक्त्रे समस्तबाह्यसद्रूपभावराशिनिष्ठचुम्बनात्मनि निगिरणप्रवृत्ते काकचञ्चुपुटाकारे सद्वृत्तिरूपसोमस्वभावपरमशीतलरसास्वादकारिणि सति नाभिमुद्रितं नाभिस्थानावधि कृत्वा [2]पूर्णकुम्भकसमावेशाभ्यासेन, तदा मन्त्रमुद्रासमूहः देहे वाग्रूपे कालरूपे च [3]परेशस्यैवाभिव्यज्यते बुद्धिरूपे च प्रत्यगात्मनि प्रकाशते, ज्ञानक्रियावेशाद्यथा [4]प्रश्ने कृते झटिति प्रतिभासते, अतीतानागतवर्तमानं तत्सर्वमवितथमेव भवति । [5]तथाभूततेजश्च सामान्याकारमन्त्रमुद्रावेशाभ्यासे दृढीभूते तमेवाभ्यासं निरन्तरं मध्ये विच्छेदशून्यमेकरसं सकृद्विभातं प्रहरपर्यन्ततां यदि नयति, यां कांचिन्मन्त्रदेवतां मुद्रादेवतां वा हृदये संधीयते; तदा [6]तामेव रुद्रशक्तिभिर्निरन्तरसमावेशावष्टम्भनवीर्यरूपाभिराकृष्टामानीतां[7] साक्षाद्रूपेण स्वशरीरतादात्म्येन प्रतिपन्नामाकृतितः[8] पश्यति । [9]तथा प्राप्तेऽपि यदि समावेशं न त्यजति तदा प्रहरद्वयं निरन्तरं समाविष्टो देह-

[1] हृदयरूपस्यान्तर्लीनस्य कृते इति पाठान्तरम् । [2] पूरककुम्भकेति पाठान्तरम् । [3] परवशस्यैवेति पाठान्तरम् । [4] प्रकटने कृते इत्यपि पाठः । [5] तथा भूते चेति पाठान्तरम् । [6] तमेवं रूपशक्तिभिः इति पाठान्तरम् । [7] आसादितामिति पाठान्तरम् । [8] आकृतितः कालतश्चेति पाठान्तरम् । [9] तथा स्वीकारे प्राप्ते इत्यपि पाठः ।

प्राणादिकं स्वकं न किंचित् पश्यति [1]निरावरणं चिद्रूपघनमेव सकलमवलोकयति । तथा एतस्मिन् सर्वदा यावदतिपरिक्षीणेन देहेन अन्यशरीरकल्पेन अविच्छेदे पुनरपि यदा समावेशाभ्यासं न परित्यजति, यदा प्रहरत्रयं निरन्तरं सकृद्विभातविभेदवन्ध्यस्वरूपे समावेशशालिनि तिष्ठति, तदा मातरो ब्राह्म्यादिकाः, योगेश्वर्यश्च तच्चक्राभ्याससिद्धाः वीराश्च अघोरादयः, वीरेश्वराः नवात्मदेवताप्रभृतयः समुन्मीलयन्ति । तच्चक्राभ्यास[2]जातविभूतयश्च सिद्धा जायन्ते । एते महता भैरवबलेन युक्ताः । यश्च शांकिनीनां शक्तीनां खेचर्यादिभेदभिन्नानां संबन्धी गणो वर्गः भैरवबलेन बलवान् । एते सर्वे परमां सिद्धिं धरण्यादिशिवान्ताध्वविषयां अनेनैव देहेन [3]स्वतन्त्रतां ददति । यतः एते सर्वे [4]मातृप्रभृतयो देवताविशेषाः "समयं दत्त्वेति" मर्यादापूर्वकं भैरवेण भगवता स्वरूपाविभेदेन स्वरूपावभासनेन भैरवचक्रानुजीवितत्वेन प्रकर्षेण [5]चोदिताः । सर्वे एते देवताचक्रेश्वरा[6]स्तदाविष्टप्राणा [7]भैरवभूता एव. अतस्तदनुगामिन्यो भवन्ति । तदुक्तं "आगत्येति" । विशिष्टं किञ्चिदेकतमं उत्तममध्यमाधमफलराशिमध्यात् खड्गगोरोचनोद्दिष्टपातालादिफलं हृदयेऽभिसंहितं भवति. तदा तदपि प्रयच्छन्ति ॥ १६ ॥

यथा-अन्येषां प्राणनाडिजयप्रभृतीनां योगानां विशिष्टचर्यासामग्र्यादिबाह्यापेक्षावशात् कालबलादिसंकोचः

[1] निरावरणेति पाठान्तरम् । [2] वीरेश्वरा नवात्मदेवताप्रभृतयः तच्चक्राभ्यासेति अधिकः । [3] स्वातंत्र्यमिति पाठान्तरम् । [4] मात्रा इति पाठान्तरम् । [5] भावितेति पाठान्तरम् । [6] तदाविष्टप्राणादिश्चेति पाठः । [7] भैरवभूत एवेति पाठान्तरम् ।

यथोक्तम्

'कुलबीजक्रमस्यान्तर्भोगः कौलं कृषादिषु'।

इति। तथा अत्र न कश्चिदवच्छेद इति समादिशति–

अनेन सिद्धाः सेत्स्यन्ति साधयन्ति च मन्त्रिणः ॥१७॥

अयं त्रिष्वपि कालेषु अविशिष्ट इत्यर्थः ॥१७॥

ननु किं तत् साधयन्ति' अनेनेत्याह

यत्किंचिद्भैरवे तन्त्रे सर्वमस्मात् प्रसिद्ध्यति।

मन्त्रवीर्यसमावेशप्रभावान्न नियन्त्रणा* ॥१८॥

यदन्यशास्त्रेषु किंचित्साध्यमुक्तं तत्सर्वमनेनैव सिद्ध्यतीति का अत्रासाध्यगणनेति यावत्। ननु केन विधानेनायं मन्त्रो ग्राह्य इत्याशङ्क्योत्तरमाह–'अस्मिन्नये न कदाचिन्नियन्त्रणा'। एतत्प्राप्तिमात्रमेव साध्यं, न त्वत्र विद्याव्रतादि किंचित्सहकारिभावेनोपयोगि केवलं परिक्षीणशङ्कातङ्कत्वमत्र उपयोगि शङ्कायाः सन्देहविप्रतिपत्तिसारतया एकरसतद्विमर्शात्मकसमावेशविघ्नभूतत्वादिति स्फुटीक्रियते ॥१८॥

अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः।

स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥१९॥

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः।

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ॥२०॥

अविधिज्ञो विधानज्ञो जायते यजनं प्रति।

आसतां तावदन्ये विषयाः, मण्डलदर्शनोपलक्षितमधिवासनादि हाद्यार्घपर्यन्तं मन्त्रार्पणविधिजातमपि न किंचि-

१ [illegible]ति पाठान्तरम्। २ साध्यानामिति पाठान्तरम्। ३ एतत्प्रा-[illegible] पाठान्तरम्।

* '[illegible]समावेशे न कदाचिन्नियन्त्रणा' इति पाठान्तरम्।

४ [illegible] इति पाठान्तरम्।

दत्रोपयोगि। एवमिति उक्तं वक्ष्यमाणं च यस्तत्त्वता निःशङ्कतया वेत्ति, स भुक्तिमुक्तिरूपसिद्धिभागी। स एव परमार्थतो योगेन समावेशलक्षणेन युक्तः। स एव सत्यतः शिवतादानभेदपाशक्षपणलक्षणां दीक्षां प्राप्तः। एतज्ज्ञानमात्रादेव सर्वशक्त्युपलक्षितोऽसौ संपूर्णस्वरूपो [1]ज्ञायते [2]सिद्धो भवतीत्यर्थः। [3]एतत्समावेशाभ्यासाद्योगं विनापि* शाकिनीकुलेन देवताचक्रेण सामान्यस्तुल्यो भवति अनेन ज्ञातमात्रेण सर्वस्य वस्तुनः पूरणात्। यजने यत् विधानमितिकर्तव्यता, तामविद्वानपि विद्वानेव भवति पूर्णतत्फललाभात्। [4]यस्तु लौकिकवैदिकशैववामदक्षिणकुलादिप्रसिद्धान्* [5]विधीन्विधित्वेन न जानाति, स एष [6]अत्र यजने विधिज्ञो जायते अनुत्तरविधिं यतो जानाति। अनुत्तरसंविन्मात्ररूपे सर्वमन्यत् बहिरङ्गं भवति ॥२०॥

ननु 'चतुर्दशयुतं' इत्यनेन यत् बीजमुक्तं तत् कथं विश्वाविभागिसंपूर्णशक्तिकस्वात्मरूपपरदेवतापरामर्श[7]मयं भवतीति निरूपयति—

कालाग्निमादितः कृत्वा मायान्तं ब्रह्मदेहगम् ॥२१॥

१ जायते इत्यपि पाठः। २ प्रसिद्धि इति पाठान्तरम्। ३ यतः समावेशाभ्यासलक्षणं योगं इति पाठान्तरम्। ४ यश्चेति पाठान्तरम्। ५ विधित्वेन नियंत्रणात्वेनेति पाठान्तरम्। ६ स एवात्र यजने इति पाठान्तरम्। ७ रूपमित्यपि पाठः।

विनापि-इत्यनन्तरमयं पाठोऽधिको दृश्यतेः–"शाकिनीकुलं शक्तिचक्रेश्वरमेकं यास्यन्ति निश्चिन्वति। भगवत्यो देवतास्तासां माननीयः तच्चक्रेश्वरतायोग्यत्वलाभात् [योगबलाद्भवति] इति।

प्रसिद्धानित्यनन्तमयमधिकः पाठः – शङ्कासङ्कोचकार्यकारणाभावग्रृत्तिविधीन्— इति।

शिवो विश्वाद्यनन्तान्तः परं शक्तित्रयं मतम् ।
तदन्तर्वर्ति यत्किंचिच्छुद्धमार्गे व्यवस्थितम् ॥ २२ ॥
अणुर्विशुद्धमचिरादैश्वरं ज्ञानमश्नुते ।
तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ॥ २३ ॥
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ।
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ॥ २४ ॥
तथा हृदयबीजस्थं जगदेतच्चराचरम् ।

*यथा घटशरावप्रभृतिप्रपञ्चवर्जने मृण्मात्रमेव सत्यं, मृद्रूपतात्मकप्रपञ्चवर्जनेनापि गन्ध इत्येव सत्यं गन्धरूपताविशेषापरामर्शे अहमित्येव सत्यं, तथाभूतभेदभङ्गेऽपि सुखदुःखमोहरूपता सारम्, सुखादिवैचित्र्यकर्तने वेद्यवेदकमात्ररूपता, [1]पर्यन्ते वेद्यवेदकरूपभेदविगलने सदित्येव अवशिष्यते, तत्रापि वर्णत्रयपरामर्शविशीर्णताकरणे आद्यवर्ण[2]मात्रविश्रान्तिः, तथा जलतत्त्वादेरपि मायातत्त्वपर्यन्तस्य वेद्यरूपस्याशुद्धाध्वमध्यपातिनः सर्वस्यैवान्त्यविश्रान्तिकाले सर्वमेकघनममृतमात्मभूतम्, [3]सैव ब्रह्मतापत्तिः ब्रह्मवादिनां विश्रान्तिः तन्निर्मथनप्रवृत्त्या [4]तु भैरवोऽपि विश्वसृष्टिकारी । गीतं च

'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥' (भ०गी०१४।३)

इति । तस्यापि [5]यदा [6]सन्मात्रविश्रान्तिधाम्नः स्वरूपभेदवि-

१ पार्यन्तिकीति पाठान्तरम् । २ वर्णमनुत्तरमात्रेत्यपि पाठः । ३ सैवेति पदं नास्ति क. पाठः । ४ अत्रेति पाठान्तरम् । ५ यथेति पाठान्तरम् । ६ संविन्मात्रेत्यपि पाठः ।

* गन्धरूपताविशेषः परामर्शतः घट इत्येव सत्यं तथाभूतं जगदेतच्चराचरमित्यधिको पाठो दृश्यते ।

गलनेन रूपं परामृश्यते, तदा प्रकाशविमर्शनशक्तिरूपेऽनुप्रविष्टस्य तस्यावभासनमिति तच्छक्तिस्वरूपात्तदभिन्नं परमार्थत इति शक्तिस्वरूपमेवावशिष्यते इति । तच्च इच्छा वा क्रिया वा ज्ञानं वा यतः सर्वं वस्तु इच्छामि करोमि जानामि वा इत्येवंभूतविमर्शशक्तिविश्रान्त्या विना न जातुचिदवभाति । इच्छामीत्यत्र च शक्तित्रयानुवेधनमेवं जानामि करोमीत्यत्राावियुक्तत्वादास्ताम् । तेन शक्तित्रयात्मकस्वरूपविश्रान्तं तदवभासमानं भवति । तस्यापि शक्तित्रयस्य एकमेव [1]स्वतन्त्रं स्वरूपं स्वातंत्र्यादेव । अथ अधऊर्ध्वग्रन्थिरूपं बिन्दुद्वयमयं संविदात्मकं परभैरवदेवतात्मकं तात्त्विकं वपुः । तदेतद्वेद्यवेदनवेदकविश्रान्तित्रयमयं [2]वर्णत्रयस्वरूपं तत्त्रयम् । तत्र यां विश्रान्तिं प्रधानीकरोति तदन्तमेवोच्चारणं [3]त्रिधा संपद्यते । [4]तत्त्रयोपभोगे भुक्तिमुक्तिरिति क्रमेण सिद्धयः [5]यत्र तदेकघन[6] एव एकः परामर्शो [7]विश्रान्तिस्थानमक्रमं सर्वं सद्रूपमिच्छादिद्वारेण परभैरवे विसृज्यते क्षिप्यते, [8]परभैरवे चाभेदेन [9]तदिच्छादिद्वारेण वेद्यतया बहिर्विसृज्यते इति नैसर्गिकसद्रूपं वेद्यं भैरवात्मकवेदकस्वरूपमित्युभयस्प[10]र्शनाच्छक्तिरूपतेति चातुर्दशी वेदकवेदनरूपावरोहेण वेद्याभिन्नसामान्यरूपता ब्राह्मी विश्रांतिः,- इत्येवंभूतविश्रांतित्रयमय[11]शान्तोदिततदुभयलक्षणत्रयैकरसताकारि परं विसर्गतत्त्वं संविद्भैरवनाथ एवेति तात्पर्यार्थः । योजना तु— कालाग्नि

१ स्वतन्त्रं रूपमिति पाठान्तरम् । २ चरणत्रयेति पाठान्तरम् । ३ इति त्रिधेति पाठान्तरम् । ४ तत्र भोग उभयभुक्तिरिति पाठान्तरम् । ५ यस्य तु । ६ तदेकघट इति पाठान्तरम् । ७ विश्रांतिस्थानक्रमामित्यपि पाठः । ८ परभैरवेच्छाभेदेनेत्यपि पाठः । ९ तदिच्छेति पाठान्तरम् । १० विमर्शनादिति पाठः । ११ शान्तादि-इति पाठान्तरम् ।

पृथ्वीतत्त्वं सप्रथमभुवनमादितः [1]कृत्वा मायातत्त्वपर्यन्तं [2]तृतीयब्रह्मणि [3]विश्रान्तम् । विश्वेत्यादिक्रमेण यत् भैरवदेवताचक्रं परभैरवीयं शक्तित्रयरूपं शक्तिचक्रं, तदनन्तस्य विसर्गस्यान्तर्विद्यते । [4]तस्य च यश्चोदकः- प्राणेन विना सर्गचोदनानुपपत्तेश्चतुर्दशः प्राणरूपः, स एव शुद्धाध्वनि विद्यातत्त्वादिके [5]शिवतत्त्वान्ते व्यापकः । यतोऽत्र स परमेश्वरो वेद्यभूतदेहादिसङ्कोचविगमात् सन्मात्रप्रमातृस्वभावत्वात् भिन्नस्य भिन्नाभिन्नस्य च सर्वस्य ज्ञाता कर्ता च । परमेश्वरो विद्येश्वरवर्गात्प्रभृति मायासङ्कटान्तः[6]पातिताभावात्सर्वगः, पाशैरागन्तुकैर्वियोगान्निर्मलः, सहजाणवमल[7]वैकल्यासंभवात् स्वच्छः, क्रमेण वेद्यराशेरिदमित्येवंभूतस्याहमित्येवाच्छादनेन व्यतिरिक्तवेद्याकाङ्क्षावियोगात् तृप्तः, स्वायतनः स्वात्मन्येव यतमानः प्रबुद्धानन्दः, तत एव भेदलक्षणाशुद्धितिरोधानात् शुचिः । एवं बोधक[8]स्वरूपमयत्वात् योऽणु[9]स्तच्चोदकविश्रांतिसमावेशाभ्यासनिष्ठः, सोऽचिरादेव तदन्तर्वर्तिशुद्धविद्यादिशिवान्ततत्त्वान्तर्गत[10]शुद्धाध्वावस्थितमीश्वरस्य संबन्धि ज्ञानं तदाक्षिप्तं च कर्तृत्वं विशुद्धं परापररूपमश्नुते प्राप्नोति । [11]एतच्च विश्रान्तित्रयाभ्यासे [12]तत्तत्फललाभोपलक्षिततुरीयपरविश्रान्तौ सर्वमभेदैकरसेनास्ते । यथाहि [13]न्यग्रोधधानायां महावृक्षस्तदात्मकस्वरूपशक्त्यभिन्न एव भवति, तथा हृदयात्मनि बीजे चरं शुद्धं, अचरमशुद्धं; चरञ्च प्रमातृ, अचरं

१ छित्वेत्यपि पाठः । २ तृतीयं ब्रह्मणोरूपे इति पाठान्तरम् । ३ विश्रान्तं परं प्राणमित्यपि पाठः । ४ तस्याग्रेऽयमधिको पाठः- अतः [अन्तः] परो यदपेक्षयेति । ५ शिवान्ते इति पाठान्तरम् । ६ पतित्वाभावादिति पाठान्तरम् । ७ वैकल्पसंभावनादन्यः इति च । ८ चोदकस्येवंभूतरूपमयत्वादित्यपि पाठः । ९ एतच्चोदकविश्रांतिः समावेशोऽभ्यासेति पाठान्तरम् । १० शुद्धाशुद्धेति च क. पाठः । ११ एतद्विश्रांतिभासे इति पाठान्तरम् । १२ तत्तत्फललाभोपलक्षणं चतुर्थ्यन्तपरमिति च पाठः । १३ न्यग्रोधनामा इति पाठान्तरम् ।

प्रमेयमिति सर्वं हृद्गतशक्ति[1]कलाया अविभागेनैव [2]भातीति ॥ २४ ॥

तदत्र 'सद्यो योगाविमोक्षदम्' इति यत् पूर्वं सूचितं परभैरवसमावेशफलं, तदुपसंहारद्वारेण प्रकटयति

एवं यो वेत्ति[3] तत्त्वेन तस्य निर्वाणगामिनी ॥ २५ ॥
दीक्षा भवत्यसन्दिग्धा तिलाज्याहुतिवर्जिता ।

एवमिति- उक्तप्रकारेण हृदयं [4]तत्त्वेन निश्चयेन निःशङ्कतया यो वेत्ति तस्य [5]दीक्षा तत्त्वेन [6]परमार्थेन [7]निर्वाणं फलत्वेन गम्यते यया सा असंदिग्धा स्वप्रत्ययेनैव एतद् हृदयस्वरूपलाभ[8]युक्ता भवति । भैरवदेवताभिर्हृदयान्तर्गताभिः स्वरूपनिमीलनात्मकप्रपञ्चस्पन्दपरिवर्जनेन स्वरूपोन्मीलनात्मकपरिस्पन्दप्रवणाभिर्दत्तमेतद् हृदयलक्षणं परं ज्ञानं [9]क्षपितश्च संकोचात्मकमूलपाश इति जानात्येव । तेन [10]दानक्षपणलक्षणां [11]दीक्षां [12]स्वप्रकाशं नयेत् । न अत्र तिलादीनामुपयोगः । एतावता जीवन्मुक्त्यात्मकपरमसिद्धिपरिनिष्ठितधियं[13] प्रति [14]अन्यलाभादिकं न किंचिदुपयुज्यते इत्युक्तम् ॥ २५ ॥

अधुना तु समावेशाभ्यासोपयोगी पूजाविधिर्वक्तव्यो यतो वक्ष्यते "कृतपूजाविधिः सम्यक्" (३३ श्लो०)

१ 'कलायाः इति च' पाठः । २ 'भवती' पाठान्तरम् । ३ 'वेदेति' पाठान्तरम् । ४ तत्त्वो- इति पाठान्तरम् । ५ दीक्षेति पदमन्यत्र नास्ति । ६ परमार्थेन भवतीति पाठान्तरम् । ७ निर्वाणफलत्वेन गच्छति यस्य सा असंदिग्धेति पाठान्तरम् । ८ लाभो भवतीत्यपि पाठः । ९ क्षपितसंकोचात्ममूलपाश इत्यपि पाठः । १० दानक्षपणलक्षणा इति च पाठः । ११ दीक्षेति च पाठः । १२ स्वप्रकाशं [स्वप्रतीतिं] इति पाठान्तराणि । १३ हृदयमित्यपि पाठः । १४ हृदयलाभेति पाठान्तरम् ।

इति । तदत्र देहप्राणभुवि बुद्धिपदे च समावेशाभ्यास इति । तत्र हृदयमात्मसात्कर्तुं न्यासं दर्शयति

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ॥२६॥
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमन्त्रिताम् ।
एकैकेन दिशां बन्धं दशानामपि कारयेत् ॥ २७॥
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशान्तये ।
शिखासंख्याभिजप्तेन तोयेनाभ्युक्षयेत्ततः ॥ २८॥
पुष्पादिकं क्रमात्सर्वं लिङ्गं वा स्थण्डिलञ्च वा ।

पुरा पूर्वं तालत्रयं [1]हृद्बीजकलात्रयविश्रान्तित्रयरूपं वैखरीशब्दपर्यन्तं स्वात्मनो दद्यात् । तत्स्वीकारकं स्वात्मानं विघ्नानां चतुरण्डगतभेदाभिमानसङ्कल्पानां शान्तये [2]बहिरन्तश्च पादपाणिहस्तमुखशब्दक्रमेण पातालभूम्यन्तरिक्षगतभेदविघ्नशमनाय कुर्यात् । एवं कृत्वा मूर्धादिस्थानतादात्म्यापत्तिभाजि हृदयस्थाने एव दण्डभङ्गिभाजि हृदयबीजेन पञ्चकृत्व उच्चारितेन जन्मचारप्रवाहलयविच्छित्तिलक्षणाचिदानन्देच्छाज्ञानक्रियालक्षणस्पन्दपञ्चकभाङ् न्यासं शरीरे कुर्यात् । शिखायाश्च तद्देहगतमूर्धादिपञ्चशक्तिकब्रह्मपञ्चकाविभागभूमिभाजः प्राणबुद्धिरूपायाः पञ्चकस्य प्रत्येकं पञ्चकभेदात्प्रथमचरमकोटिद्वयभेदस्पर्शाच्च सप्तविंशतिकृत्व उच्चारितेन हृदयबीजेन हृदयरूपताविश्रमणरूपं नियन्त्रणात्मकं बन्धं कुर्यात् । ततश्च [3]स्थानबीजरूपहृदयमयीकर्तुं दश दिशः सकृत्सकृ[4]दुच्चार्यमाणेन हृदयबीजेन बध्नीयात् हृदयरूपानुचरपरामर्शशेषा एव कुर्यात् । इत्येवं कृत्वा पुष्पादिके

1 हृदयबीजेति पाठान्तरम् । २ बहिः स्वपाणिहस्तेति पाठान्तरम् । ३ स्थानरूपीति पाठान्तरम् । ४ उच्चारितेनेति पाठान्तरम् ।

पूजोपकरणेऽपि अर्घ्यपात्रविश्रान्तपरमानन्दरसस्य सप्तविंशतिकृतोच्चारितेन हृदयबीजेन हृदयतादात्म्यं कृत्वा तद्रसाभ्युक्षणद्वारेण हृदयतादात्म्यं कुर्यात् । अनन्तरं पूजाधारस्य लिङ्गस्थण्डिलादेः । एवं सामान्येन भेदं विलाप्य [1]देहप्राणाधिष्ठितमपास्य तदुपास्ययागगृहेऽप्यपोह्य पूजोपकरणेषु पराकृत्य पूजाधारेऽपि निराकुर्यादिति तात्पर्यम् ॥ २८॥

एवं कृते सति पश्चात्तत्र [2]पूजाधारे बाह्याभ्यन्तरादिबहुभेदशतान्यतम[3]रूपे यथारुचि यथासंभवपरिगृहीते[4] लिङ्गस्थण्डिलमण्डलादिके पूज्यपरिकल्पनापूर्वकं [5]पूजास्वरूपमाह

चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ॥ २९ ॥
तत्र सृष्टिं यजेद्वीरः पुनरेवासनं ततः ।
सृष्टिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ॥ ३० ॥
सर्वतत्त्वसुसंपूर्णां सर्वावयवशोभिताम् ।
यजेद्देवीं महाभागां सप्तविंशतिमन्त्रिताम् ॥ ३१ ॥
ततः सुगन्धिपुष्पैश्च यथाशक्त्या समर्चयेत् ।
पूजयेत्परया भक्त्या स्वात्मानं च निवेदयेत् ॥३२॥

चतुर्दशेति- जाग्रदादितुर्यावस्थान्तदशाचतुष्टयव्याप्तिशालि यदेतदौकारान्तं बीजस्य वपुः, तावत्यां व्याप्तावासनं कल्पनीयम् । तथाभूतौकारविश्रान्ता[6] आदिक्षान्ता सृष्टिर्विसर्गशक्तिस्वीकृता उपरिवर्तिनी भावनीया । सर्वाभेदघनतु-

1 देहप्राणादिष्विति पाठान्तरम् । २ पूजाधारेष्वपीति क. पाठः । ३ रूपेणेति पाठान्तरम् । ४ परिगृहीतेति पाठान्तरम् । ५ पूजास्वरूपावगमादिति पाठान्तरम् । ६ विश्रान्ता इत्यनन्तरं सर्वैर्वा- इति पदमस्ति ।

र्यातीतवृत्तिविश्रान्त्यां तस्यां यत् विश्रमणं विसर्गः, स एव यागः । तस्यामपि च तुर्यातीतवृत्तौ विसर्गकलायां स्वीकृतसकलसृष्टिकार्यायां तदेव जाग्रदादिदशाचतुष्कक्रोडीकारकमौकारान्तं रूपं प्रक्षिप्य यजेत् [1]धन्मध्यवर्तिविसर्ग उभयकोटि[2]गतसद्वृत्तिस्पर्शी, विसर्गा[3]त्मरूपामत एव सर्वतत्त्वमयीं सर्वैश्च अवयवायमानैर्भावराशिभिर्युक्तां महेशानस्य परभैरवस्य अभेदेन वर्तमानां श्रीपरादेवतामनुत्तरस्वरूपां स्वीकरोति । एतदुक्तं भवति । हृदयस्य मूलभागे [4]सद्वृत्तिरूपे वेद्यांशे जाग्रत्स्वप्नसुषुप्तात्मकातिस्फुटस्फुटास्फुटास्फुटभेदत्रयशालिनि सर्वदा सन्मात्रप्रथमकलावपुषि विश्रम्यावृत्तौ अनुत्तररूपायां शक्तिशिवतत्त्वान्तं क्रमेण तुरीयपदपर्यन्तं विश्रान्तेन क्रमाभिन्नसमस्ततत्त्वस्वीकरणादासनव्याप्तिः प्रदर्शिता भवति । ततो विसर्गात्मिका षोडशी भैरवात्मिका कला यावत् सर्वोत्तीर्णा स्पृश्यते, तावत् तस्यां सर्वमभेदेन आस्ते इति समस्ताभेदरूपा सप्तदशी यासौ कला, सैव अनुत्तररूपा याज्या । तस्यां [5]तथा प्रवर्तिता विश्रान्तिः । स एव परमार्थतो यागः । तद्रूपतासिद्ध्यर्थमेव तु सुगन्धिभिरयत्नत एव हृदयानुप्रवेशशालिभिः पुष्पै[6]र्हृदयान्तःस्वरूपसमर्पणादेव हृदयस्य पोषकैर्बाह्याभ्यन्तरैः सर्वैर्द्रव्यैर्यथाशक्तितया, अस्वीकृतशक्तिस्वरूपस्य सङ्कुचितवृत्तेर्यागे प्रत्ययोग्यत्वात् शक्त्या स्वरूपविकासरूपया तदुपयोगिन्यापि बाह्यया आनन्दिन्या स्नानविलेपनधूपताम्बू-

१ येनेति पाठान्तरम । २ गतस्वरसद्वृत्ति- इति पाठान्तरम । ३ सर्वातीतरूपामित्यपि पाठः । ४ सद्व्याप्तिरूपवेद्यांशे इति पाठान्तरम । ५ तथा इत्यनन्तरमयं पाठोऽधिको दृश्यते - तथा पूरणा [पूर्णा] अत एव सप्तविंशतिकृत्वः [कृत्व] प्रवर्तितेति । ६ हृदयान्तेति पाठान्तरम् ।

लासवादिसंभारसुभगया बाह्यद्रव्यशक्त्या सम्यगर्चयेत् । कथम्, परया भक्त्या परिमितस्य देहप्राणपुर्यष्टकादेरप्रधानताकरणेन तद्रूपतानिमज्जनात्मकप्रह्वीभावसंपादनपुरःसरेण तदुक्तरूपयाज्यदेवतात्मकपरसंविद्रूपप्रधानत्वापादनलक्षणेन भजनेन [1]श्रद्धातिशयेन समावेशदायिनेत्यर्थः । परा चासौ भक्तिः । पुष्पादेर्यागोपकरणस्य स्वात्महृदयहठानुप्रवेशसुन्दरो यो भागो रमणीयः परिमलः तेन पूर्यमाणमात्मानं सर्वाभेद[2]रूपवृत्तिनिश्चयात्मना नियमेन [3]वेदयेत् । सप्तविंशतिकृत्वः[4] उच्चारणावसरे तत्तत्पुष्पादिबाह्याभ्यन्तरभावराशि[5]संपूर्यमाणाभिन्नस्वरूपं श्रीपरादेवतामयमात्मानं यथा वेत्ति, तथा पुनःपुनरात्मस्वरूपं परामृशेदिति यावत् । एषा [6]तावत्स्फुरणरूपा पूजा । ततश्च जठरीकृतसमस्तभोग्यस्वभावतत्त्वप्रसरस्य भोक्तुर्भगवतो भैरवस्य उद्दीपनात्मना होमेन तदन्तःकृतसंस्कारशेषभोग्यस्वभावविलापनदहनसामर्थ्यात् परामर्शः कर्तव्यो येन जीर्णन्यायेन संस्कारस्य बीजरूपतया [7]सुषुप्त्यवस्थावत् पुनरुत्थानलक्षणसंस्कारात्मकमूलभेदप्रसवमहाव्याधिशङ्का शाम्यतीति ॥ ३२ ॥

अनेनाभिप्रायेण यजनमुपसंहरन् होमं सूचयति

एवं यजनमाख्यातमग्निकार्येऽप्ययं विधिः ।

तत्रापि तिलादीनां शिखासंख्याभिजप्तेन तोयेन अभ्युक्षणं स्रुक्स्रुवादीनां वह्नौ "चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना" इत्यादिसंपुटीकरणपर्यन्तं याज्यदेवतासमर्पणम् । ततस्ति-

१ सद्य अतिशयेनेति पाठान्तरम् । २ रूपां वृत्तिमिति पाठान्तरम् । ३ नियमयेद इति पाठान्तरम् । ४ कृत्वोच्चारणावसरे इति पाठान्तरम् । ५ संपूर्यमाणां निजस्वरूपमिति पाठान्तरम् । ६ तावत्पूरणरूपेति पाठान्तरम् । ७ सुषुप्त्यवस्थादृष्टान्तेन [सुषुप्तावृत्तान्तेनेति?] पाठान्तरम् ।

लाज्यादिहवनं संपूर्णरूपतया 'आत्मानं च निवेदयेत्' इति व्याख्यातेन क्रमेण पूर्णाहुत्यार्पणमिति अग्निकार्यविधिः । एवं यागहोमोभय[1]मेलनात्मकं पूर्णं हि पूजायाः स्वरूपम् ॥

इयता च स्वात्मरूपा श्रीभगवती परा देवी सम्यक् पूजिता भवति । यतोऽन्तर्मलस्य[2] [3]विगलनं [4]यावन्न जातं तावत् स्फुटसंविदात्मकत्वं पूरितं न भवति, ततो पूजैवेयमित्याभ्यन्तरसंकल्पनिवृत्त्या बाह्यद्रव्यसंहरणेनैतदाह

कृतपूजाविधिः सम्यक् स्मरन् बीजं प्रसिद्ध्यति ॥३३॥

आद्यन्तरहितं बीजं विकसत्तिथिमध्यगम् ।

हृत्पद्मान्तर्गतं ध्यायेत् सोमांशुं नित्यमभ्यसेत् ॥३४॥

सम्यगिति उक्तप्रकारेण कृतपूजाविधिः, सम्यगिति च उक्तवक्ष्यमाणोपदेशदिशा बीजं स्मरन् परामृशन् सम्यक् प्रसिद्ध्यति परभैरवदेवतावदनेनैव देहेन समस्तविभूतिभाजनं भवति । अस्य हृदयपरामर्शस्याभिनवाभिनवरूपतया भासमानस्य पूर्वपूर्वतरादेः सम्यगनवभासमानत्वात् कालभेदयोगापहस्तनादवभासनीयस्य वस्तुनः सर्वथा [5]आभ्यन्तरस्यैव सतः प्रकाशनात् स्मरणरूपसादृश्यात् स्मरणत्वेन व्यपदेशात् शतृप्रत्ययेन च भूताभिन्नं वर्तमानं दर्शयित्वा इदं सूचितं भवति । तथा अयं परामर्शः स्वीकर्तव्यः, यथा [6]विच्छेदशून्यः सकृद्विभातस्वभावोऽकालकलितः संपद्यते । 'सम्यक्स्मरन्निति (यत्)' उक्तं तत् सम्यक्त्वं यद्यपि पूर्वं दर्शितं

---

१ मेलनात्मकादिपूर्णं हि .इति पाठान्तरम् । २ अन्तर्लीनस्येति क. पाठः । ३ विगलितमिति क. पाठान्तरम् । ४ यावत्स्वात्मरूपं नेति पाठान्तरम् । ५ सर्वदाभ्यन्तरे रहस्य इवेति पाठान्तरम् । ६ विभेदशून्य इति पाठान्तरम् ।

"कालाग्निमादितःकृत्वा.................. ।" (२१ श्लो०)

इत्यनेन विस्तृतग्रन्थेन तथापि स्फुटेन रूपेण निर्णीतं निरूपयति 'आद्यन्तरहित'मिति । बीजं वाचकरूपं हृदयं, तस्य वाच्यं सोमांशं सशक्तिकस्य भगवतो भैरवनाथस्य यामलं संघट्टप्रभापुञ्जस्तं वाच्यवाचकाभेदक्रमेण अभ्यसेदिति उपदेशः । सोमांशमिति पाठे तु परिपूर्णज्ञानचन्द्रात्मकं प्रकाशानन्दपरमार्थं । [1]तत एव ज्वलनगलनवृत्तिसारसंकोचविकासशक्तिप्रदर्शितविश्वोन्मेषनिमेषशतसंपादनाप्रतिहतसामर्थ्यमूलेन उत्तरोत्तरेण सकार-औकार-अःकारलक्षणेन भागत्रयेण आविष्टमनुत्तरं त्रिकोणात्मकं महाहृदयम् । तस्य च त्रयो भागा अंशाः । सोमश्च अंशश्चेति समाहारे द्वन्द्वः । तदेतत् चतुष्कमाभिमुख्येन स्वसंविद्रूपहृदयविश्रान्तं सत् बुद्धिप्राणदेहभूमिपर्यन्तस्वीकारात्मना समावेशपर्यन्तं क्षिपेत् तद्रूपपरामर्शप्रधानं विगलितजडभावं तदवष्टम्भैकसारं बुद्धिप्राणदेहेन्द्रियादिकं समस्तं कुलं तत्रैव तद्रूपप्रकाशनविकासवशात् प्रकाशकुलतामायान्तं कुर्यादिति विसर्गचतुष्कसमावेशोऽनेन दर्शितः । तत्र मुख्यमेव तावत् पूर्णहृदयस्वरूपमाह आद्यन्ताभ्यामुत्पत्तिविनाशाभ्यां रहितं यत् [2]विश्वस्य बीजं, तत एव बीजत्वात् विश्वात्मना विकसत् अनवरतं विकासं गच्छत् विश्वस्य कालरूपाणां तिथीनां मध्यगं सामान्यरूपतया अविभागपरामर्शरूपं स्वस्मिन्हृदये संविल्लक्षणे संकोचविकासलीलायोगात्कमलरूपेऽन्तर्गतं तां संविदं प्रविश्य सङ्कोचहठापसरणकारितया विकासयत् ध्यायेत् नित्यम् । अतश्च पूर्णभैरवतासिद्धिः । उत्थानापेक्षया पाठापेक्षया च । आद्यन्तौ स्वरव्यञ्जनरूपौ । तद्रहितं यत् बीजं

---

१ तदेवेति पाठान्तरम् । २ विगृह्येति पाठान्तरम् ।

विसर्गात्मकं यतश्च अन्या पञ्चदश तिथयो विकसन्ति, तच्च सर्वतिथीनां[1] मध्यगतम् । तत् हृदयपद्मे पूर्ववत् ध्यायेत् । ‡एतद्बीजापेक्षया आद्यन्ताभ्यां व्यञ्जनविसर्गाभ्यां रहितं त्रिशूलवृत्तिमात्ररूपं, विकसत् तिथिषु प्राणापानकलासु मध्यगतं तत्प्राणरूपसमावेशकारि तद्द्वारेण देहं समाविशत् बीजरूपेण हृदि ध्यायेत् । अवर्गे स्थिता वर्णाः । आदयः स्वराः, अन्त इति यः 'तदन्तः कालयोगेन' इत्यत्र विसर्ग उक्तः; तेन स्वरविसर्गाभ्यां रहितमनच्कसद्वृत्तिरूपं बीजं तथैव [2]विकासिनीषु प्राणापानकलासु मध्यगतं देहे हृदि ध्यायेत् ॥ ३४ ॥

[3]अत्र फलमाह—

यान्यान् कामयते कामांस्तान्ताञ्छीघ्रमवाप्नुयात् ।
अज्ञः प्रत्यक्षतामेति[4] सर्वज्ञत्वं न संशयः ॥ ३५ ॥
एवं मन्त्रफलावाप्तिरित्येतद्रुद्रयामलम् ।
एतदभ्यस्यतः सिद्धिः सर्वज्ञत्वमवाप्नुयात् ॥ ३६ ॥

एताश्च सिद्धय उक्ता एव, एषु 'कालाग्निमादितः०' इति अत्र 'शीघ्रमिति' '[5]मुहूर्तं स्मरते यस्तु' इति '[6]अस्मात् प्रत्यक्षतामेति सर्वज्ञत्वं' इति च प्रहरत्रयमात्रेण सिद्धिरुक्ता । प्रहरचतुष्कविभेदेन समावेशे तु सर्वस्मिन्नेव प्रकाशमये दिनरूपतां गते शर्वरि सङ्कोचे क्षीणे अनेनैव देहेन भैरववत् सर्वज्ञो भवति । एतदुपसंहरति- 'एवमिति' एवं सर्वेषां

१ बीजानामिति पाठान्तरम् । २ विकसत्सु इति पाठान्तरम् । ३ तत्र क. पाठः । ४ यातीति पाठान्तरम् । ५ मुहूर्तादीनामिति पाठान्तरम् । ६ अग्नेः प्रत्यक्षतामिति पाठान्तरम् ।

‡ अयं पाठोऽधिको दृश्यते:- इह विशेषभोग्यस्वभावविलापनदहनपरामर्शः कर्तव्यः विसर्गांशसमावेशः ।

[1]मन्त्रफलानां [2]परापरसिद्धिरूपाणां यस्मादित एव अनुत्तरबीजाद्व्याप्तिः, अतो हेतोरेतदेव सपादकोटिरुद्रयामलफलसंपादकत्वात् रुद्रयामलं शिवशक्त्योरत्र नित्यसंघट्टात् । अत एव एतदभ्यस्यतः संक्षेपतः फलं सर्वज्ञत्वसर्वकर्तृत्वलक्षणभैरवरूपतालाभ इत्याह

'एतदभ्यस्यतः............'

इति । अभ्यासेन विनापि तु जीवन्मुक्तता परमा कौलिकी सिद्धिरिति शिवम् ॥ ३६ ॥

—:० ०:—

यदालूनविशीर्णं सद्गोपितं तन्त्रभाषया ।
अत्राभिनवगुप्तेन भासितं[3] तदनुत्तरम् ॥ १ ॥
एतद्विवेकनिष्ठास्तु मा भूत श्रमभाजनम्[4] ।
सच्छिष्याः प्राप्नुतात्[5]यैव भैरवीभावसंपदम् ॥ २ ॥
संपूर्णानुत्तरानन्दयोगक्षेमादि[6] जानताम् ।
त्रिलोकीकवलीकारसमावेशविशारदाः ॥ ३ ॥
यस्यां सदात्मना पूर्णमिच्छाज्ञानक्रियात्मना ।
विसृज्यते यतश्चैमां वन्देऽनुत्तरसंविदम् ॥ ४ ॥

१ मन्त्रकलानामिति पाठान्तरम् ।
२ परापराणां कौलिकीसिद्धि इत्यपि पाठः ।
३ भाषितमित्यपि पाठः ।
४ भाजनाः इति पाठान्तरम् ।
५ प्राप्नुयादेव इत्यपि पाठः ।
६ भिजायतामिति पाठान्तरम् ।

अभिनवरूपाशक्ति-
स्तद्गुप्तो यो महेश्वरो देवः ।
तदुभययामलरूप-
मभिनवगुप्तं शिवं वन्दे ॥ ५ ॥

समाप्ता इयमनुत्तरतत्त्वविमर्शिनी
परात्रीशिकालघुवृत्तिः—
त्रिनयनचरणसरोरुहचिन्तनलब्धप्रसिद्धीनाम-
भिनवगुप्तपादानां कृतिरिति शिवम् ॥

—:-❀-:—

KASHMIR SERIES OF TEXTS AND STUDIES.
No. LXIX.

THE PARĀTRIŚIKĀ VIVRITI OF RĀJĀNAKA LAKSHMIRĀMA

EDITED BY
PANDIT JAGADDHARA ZĀDU SHĀSTRI,
M. A., M. O. L., H. H.,
SUPERINTENDENT RESEARCH DEPARTMENT
HIS HIGHNESS' GOVERNMENT,
JAMMU & KASHMIR,
SRINAGAR.

Published under the authority of the Government of
His Highness Rājarājeśvara Mahārājadhirāj
Sri MAHĀRĀJĀ HARISINGHJI BAHĀDUR,
G.C.S.I., G.C.I.E., K.C.V.O., LL.D.
MAHĀRĀJĀ OF JAMMU & KASHMIR

SRINAGAR.
Printed at the Mercantile Press
1947 A.D.

(All rights reserved)

Published by
Pandit Jagaddhara Zādū Shastri,
for the Research Department,
Jammu & Kashmir Government,
Srinagar.

कश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६९

श्रीपरात्रीशिका

राजानक-पण्डितलक्ष्मीरामकृतविवृत्युपेता ।

श्रीराजराजेश्वर-महाराजाधिराज-कश्मीरनरेन्द्र-
श्रीहरिसिंहजी-बहादुराज्ञया

रिसर्चकार्यालयाध्यक्ष-पण्डितजगद्धरज़ाडूशास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संशोधनादिसंस्करणोत्तरं
संपाद्य

श्रीनगरे 'मर्कण्टाइल' मुद्रणालये मुद्रापयित्वा
प्राकाश्यमुपनीतम् ।

संवत् २००४ कश्मीर-श्रीनगर ख्रैस्ताब्दः १९४७

(अस्य ग्रन्थस्य मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः
स्वायत्तीकृताः सन्ति)

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पाटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन् सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत् सर्ववन्द्यत्वमाप ॥१॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम ॥ २ ॥

परात्रीशिका ।

राजानक-पण्डितलक्ष्मीरामकृतविवृत्युपेता ।

यतः प्रवृत्ताः सरित इच्छासंवित्क्रियात्मिकाः ।
ता यमावेदयन्त्येव तं वन्दे चित्स्वधार्णवम् ।

श्रीपरमशिवभट्टारकचित्स्वधासमुद्रस्य पूर्णस्वरूपस्य ज्ञानक्रियाशक्त्योरनुन्मीलनावस्थायां किञ्चित् स्पन्दनरूपं तत् संघट्टात्मकं वर्णानां मूलकारणं अकारादिहकारान्तवर्णप्रत्याहारलक्षणं पराहन्तास्वरूपमहमिति चिन्मयं स्रोतः प्रथमं विकासमापन्नं, ततः सिसृक्षया अन्योन्यमद्धा अवियुक्तज्ञानक्रियात्मकं परमशिवेच्छयैव परस्परं गुणप्रधानभावेन विभिन्नं सरिद्युग्मं प्रसृतम् । ज्ञानसरितश्चित्तबुद्धिलक्षणान्तःकरणं[1] स्रोतः प्रसृतं, तस्मात् ज्ञानेन्द्रियप्रणाल्यो निर्गताः । क्रियासरितो दशविधप्राणस्रोतः प्रसृतं, तस्मात् कर्मेन्द्रियप्रणाल्यो निर्गताः । यत उक्तम्—

'न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया' ।

इति । तत्र ज्ञानशक्तिस्रोतोद्वारा शिवार्णवप्रवेशोपायं निर्णेतुमुद्यताः शैववेदान्तिसांख्य[2]तार्किकादयः । क्रियाशक्तिस्रो-

---

१ 'करणस्रोतः' ख. पाठः । २ 'सांख्यादयः' क. पाठः ।

तोद्वारा निर्गन्तुमुद्युक्ताः पातञ्जलहठयोगि[1]पूर्वमीमांसकादयः[2]। भैरवभट्टारकस्तु भक्तजनमनुग्रहीतुं स्पन्दात्मकेन परापश्यन्त्यादिवाक्चतुष्टयलक्षणेन स्रोतसा राजयोगशब्दवाच्येन ज्ञानक्रियाशक्तिसंघट्टात्मकेन अकारादिहकारान्तवर्णविकासात्मकमधिजिगमिषता अनुत्तराख्यं ज्ञानक्रियात्मकमध्वानमुपदिदिक्षति भैरवीप्रश्नप्रस्तावनया । तथाच श्रुतिः—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

इति ।

श्रीभैरवी

अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदम् ।
येन विज्ञातमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥

भोः देव अनुत्तरं न विद्यते प्रकृष्टमुत्तरं यतस्तदनुत्तरं चिद्धनं वस्तु कौलिकसिद्धिदं कुले देहे भवा कौलिकी सिद्धिश्चिदैकात्म्यं तां ददातीति तादृशम् कौलिकीसिद्धिर्जडस्यापि देहादेश्चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिः । उक्तं च—

'देहादिषु चेत्यमानेष्वपि चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिः'
(शक्तिसू० १६)

कथं केन प्रकारेण भवेत् सद्य इति परिज्ञानक्षण एव । तमुपायं वद इत्यर्थः । येन उपायेन अनुभूतमात्रेण अयं नरः खेचरीसमतां खेचरीणां तव चिदेकरूपस्य शक्तीनां साम्यं स्वातन्त्र्यरूपमाप्नोति मुक्तो भवतीत्यर्थः ॥ १ ॥

एतद्गुह्यं महागुह्यं कथयस्व मम प्रभो ।

---

१ 'योगवादि' ख. पाठः । २ 'कधर्मशास्त्राद्यः' ख. पाठः ।

हृदयस्था तु या शक्तिः कौलिकी कुलनायिका ॥ २ ॥
तां मे कथय देवेश येन तृप्तिं लभाम्यहम् ।

यद्यप्येतत् गुह्यं गोप्यं ततोऽपि महागुह्यं गुह्यतरं हे प्रभो प्रभवनशील ! तदपि मम त्वदभिन्नायाः कथयस्व वैखरीवाचा बोधय भक्तानुग्रहार्थम् । वैखरीलक्षणं तु वाक्यपदीये-

'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरीवाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥'

इति । तथा या चिच्छक्तिर्हृदयस्था हृदये स्थिता कौलिकी देहादिव्याप्त्री कुलनायिका कुलस्य देहस्य नायिका चिदैकात्म्योपपादिका तां शक्तिं च स्वरूपतो मे कथय, हे देव येन श्रुतेन तृप्तिं निराकाङ्क्षतां लभेऽहम् ॥ २ ॥

श्रीभैरवः

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरम् ॥ ३ ॥
कौलिकोऽयं विधिर्देवि मम हृद्व्योम्न्यवस्थितः ।
कथयामि सुरेशानि सद्यः कौलिकसिद्धिदम् ॥ ४ ॥

हे देवि ! उत्तरस्य चित्प्रकाशस्य अपि यदनुत्तरमुत्कृष्टं विमर्शात्मकं स्वरूपं तत् शृणु । अयं विधिरुपायः कौलिको जडस्य देहादेश्चिदेकरूपतासंपादकः, अग्निरिव आयसपिण्डस्य अग्नितोपपादकः । किन्तु अद्यावधि केनापि न पृष्टोऽयं विधिः, अतो मम हृद्व्योम्नि एव अवस्थितो न बहिः प्रकाशितः, सद्यः कौलिकसिद्धिदं देहादेश्चिदैकात्म्योपपादकमुपायं कथयामि ब्रवीमि ॥ ४ ॥

तदेव वक्तुमुपक्रमते—

अथाद्यास्तिथयः सर्वे स्वरा बिन्द्ववसानगाः ।
तदन्तः कालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥ ५ ॥

अथ इत्युपक्रमे आद्या अकाराद्या बिन्द्ववसानगा अंका.

रपर्यन्तास्तिथयः पञ्चदश वर्णाः स्वरास्तत्संज्ञकाः तदन्तः तेषां वर्णानां उच्चारमध्ये कालयोगेन कालः कलना सूक्ष्मक्रियाशक्तिस्तस्य योगेन सम्बन्धेन

'प्राक् संवित् प्राणे परिणता'

इत्युक्तेः, सोमसूर्यौ प्राणापानौ प्रकीर्तितौ प्रवृत्तिहेतू प्रोक्तौ । अथच तिथयः प्रतिपदाद्याः सूर्याचन्द्रमसोः सन्निकर्षविकर्षाभ्यां कालयोगेन च प्रवर्तन्ते इति बाह्योऽर्थः श्लिष्टः सुगमः ॥ ५ ॥

अथ वर्णानां वाच्यवाचकतया सर्वात्मकत्वं वक्तुं प्रक्रमते--

पृथिव्यादीनि तत्त्वानि पुरुषान्तानि पञ्चसु ।

क्रमात् कादिषु वर्णेषु[2] मकारान्तेषु सुव्रते ॥ ६ ॥

अकारादिविसर्गान्तं शिवतत्त्वं कादिङान्तं धरादिनभोन्तं भूतपञ्चकं, चादिञान्तं गन्धादिशब्दान्तं तन्मात्रपञ्चकम्, टादिणान्तं पादादिवागन्तं कर्माक्षपञ्चकम्, तादिनान्तं घ्राणादि श्रोत्रान्तं धीन्द्रियपञ्चकम्, पादिमान्तं मनोऽहङ्कारबुद्धिप्रकृतिपुरुषा[3]ख्यपञ्चकम् ॥ ६ ॥

वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम् ।

तदूर्ध्वं शादि विख्यातं पुरस्ताद्ब्रह्मपञ्चकम् ॥ ७ ॥

वायवी-आग्नेयी-वारुणी-ऐन्द्री-(पार्थिवी) धारणास्तासां स्था[4]नवाचकं यादि चतुष्टयं, तदूर्ध्वं शादीनां पञ्चानां ब्रह्मपञ्चकं ईशानतत्पुरुषाघोरवामदेवसद्योजाताख्यं विख्यातं वाच्यम् । पश्यन्त्यात्मकसत्त्वानुवृत्त्या य स्पर्शः,

1 'प्राह' क. पाठः । 2 'वर्गेषु' क. पाठः । 3 'रूपपञ्च' क. पाठः । 4 'स्थानं' क. पाठः ।

र रूपं, ल रसः, व गन्धः, देहव्यापकसूर्यरूपप्रणवचिन्तनं पार्थिवीधारणा, दक्षिणपादाङ्गुष्ठोत्थितकालाग्निज्वालाभिर्बाह्यान्तरदेहस्य भस्मीभूतत्वभावना आग्नेयी, चण्डवायुना शारीरभस्मनो दशदिग्गतत्वभावनं वायवी, द्वादशान्तपतितेन शाक्तामृतेन तत्स्थानस्य क्षालितत्त्वभावनं, ततो जीवस्य कुण्डलिन्या सह व्योमस्थितस्य प्राणप्रतिष्ठया अमृतेन हृद्यवतारणं वारुणीधारणा ॥ ७ ॥

अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता ।

अकारादिक्षकारान्ता वर्णसृष्टिर्वर्णक्रमेण अमूला अकारमूला अकारसमवायिकारणका कथिता ज्ञेया । अकारस्य सर्ववर्णात्मकत्वं श्रुतिराह—

'अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना वह्वीर्नानारूपा भवति ।'

इति । गीतास्वपि—

'अक्षराणामकारोऽस्मि...... .... ।' (१०।३३)

इति । तथाहि— परमेश्वरस्य स्वात्मविमर्शः अ इति, तत्रैव आनन्दशक्तिः, आ इति, पूर्णेच्छा इ इति, इच्छाज्ञानोन्मुखेशनं ई इति, भावोन्मेषोन्मुखं ज्ञानं उ इति, अनुत्तरसंवित्संकोचादूनीभूता ऊ इति, सैव स्वरूपविस्तरेण शून्यी[1]भूतेव बहिर्मुखा ऋॠ इति, निश्चलशून्यताप्त्या ऌॡ इति, एतच्चतुष्कं शून्यत्वाप्त्या दग्धबीजमिव षण्ढरूपं भाष्यते, नतु सर्वथा बीजत्वव्यपगमः । अनुत्तरानन्दयोरिच्छेशनयोश्च मिथः संयोगे ए इति, उक्तंच—

'अवर्ण इवर्णे ए' इति (का० वृत्ति १।२।२)

1 'शून्यभूते' क. पाठः ।

प्रकाशोऽर्थोपरक्तोऽपि स्फुटिकादिजडोपमः ॥'

(ई० प्र० १।५।११)

इति । अथच तृतीयं ब्रह्म अघोरमन्त्रः चित्परामर्शयुतो भैरवात्मनः स्वच्छन्दभैरवस्य हृदयं सारभूतो महामन्त्रः ॥९॥

एतन्नायोगिनीजातो नारुद्रो लभते स्फुटम् ॥१०॥
हृदयं देवदेवस्य सद्यो योगविमोक्षदम् ।

एतदहन्तापरामर्शात्मकं सर्ववेद्यं किमपि परमं हृदयं रहस्यभूतं देवदेवस्य चिदात्मनो नारुद्रो योगिनीव्यतिरिक्तजातो न स्फुटं लभते नोपलभते । यश्च रुद्रांशो भाविभैरवीभावो न स्यात् सच नोपलभते । स्फुटमिति देहाहंभावन्यक्कारेण चित्प्राधान्येन यश्चोपलभते स योगिनीजातो रुद्रांशश्च प्रत्यासन्नभैरवीभावः सद्यो लाभक्षण एव योगविमोक्षदं योगश्चिदात्मसमापत्तिर्विमोक्षश्चिदेकमयता तद्ददातीति ॥ १० ॥

पश्यन्तीवाचोच्चारे कृतेऽस्य महिमानमाह—

अस्योच्चारे कृते सम्यङ्मन्त्रमुद्रागणो महान् ॥११॥
सद्यस्तन्मुखतामेति स्वदेहावेशलक्षणम् ।

अस्य महामन्त्रस्य अहमित्येवंलक्षणस्य अघोरमन्त्रस्य च उच्चारे अविरतं तत्तद्देवतानुसंधानेन परामर्शे सम्यगिति देहाहंभावविस्मरणपूर्वं चित्प्राधान्येन कृते सति मन्त्रमुद्रागणो महान् मन्त्र[1]मुद्रादेवतासमूहः सद्यो विमर्शक्षण एव तन्मुखतां तस्य योगिनः संमुखत्वमेति, कथं स्वदेहावेशलक्षणं स्वदेहे योगिदेहे आवेशो देवानां लक्षणं लक्ष्म यत्र संमुखत्वप्राप्तौ ॥ ११ ॥

१ 'मन्त्रदेवता' क. पाठः ।

अथ समाधेः समयोगेन प्रभावमाह—

मुहूर्तं स्मरते यस्तु चुम्भकेनाभिमुद्रितः ॥ १२ ॥
संबध्नाति तदा सर्वं मन्त्रमुद्रागणं नरः ।
अतीतानागतानर्थान् पृष्टोऽसौ कथयत्यपि ॥ १३ ॥

यो योगी चुम्बकेन शाक्तस्पर्शेन अभिमुद्रितः संबद्धो मुहूर्तं घटिकायुग्मं चिदात्मानं स्मरते निरन्तरं अहमित्येवं परामृशति, स एव नरो मन्त्रमुद्रागणं मन्त्राणां मुद्राणां च देवगणं तदा स्वस्वामिभावेन संबध्नाति प्रत्यक्षीकुरुते. स एव व्युत्थाने केनाचित् शुभाशुभं स्वस्य जगतो वा पृष्टः सन् अतीतानागतान् भूतभविष्यत्कालेन व्यवहितान् अर्थान् प्रयोजनानि कथयति तस्य वाणी न व्यभिचरतीत्यर्थः ॥ १३ ॥

प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन् ।
साक्षात्पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः ॥ १४ ॥

प्रहरादिति ल्यब्लोपे पञ्चमी, प्रहरमात्रं देवतारूपं चिदात्मानमधिष्ठाय समुच्चरन् परामृशन् समाधिस्थो योगी यद्यदभिप्रेतमभिमतमिन्द्रादिदेवतारूपं स्यात् तत्तद्देवतारूपमसंदिग्धं साक्षात् पश्यति रुद्रशक्तिभिः परमेशशक्तिभिर्ब्राह्म्यादिभिराकृष्टं नोदितम् ॥ १४ ॥

प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन् ।
त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः ॥ १५ ॥
वीरा वीरेश्वराः सिद्धा बलवाञ्छाकिनीगणः ।
आगत्य समयं लब्ध्वा भैरवेण प्रचोदिताः ॥ १६ ॥
यच्छन्ति परमां सिद्धिं फलं यद्वा समीहितम् ।

प्रहरद्वयं चेत स्मरन् समाधौ विश्रान्तो योगी व्यो-

मस्थो जायते खगतिं प्राप्नोति समाधिविश्रान्तत्वात्, प्रहरत्रयं चेत् समाधिविश्रान्तस्तदा भैरवनाथादाज्ञामादाय तेन प्रेरिता मातरो ब्राह्म्याद्याः पञ्चविधकृतकारिण्यः वीरा योगिनो वीरेश्वरा योगीन्द्राः सिद्धाः कपिलादयः शाकिनीगणो योगिनीसमूहः तस्मै प्रहरत्रयं समाधिस्थाय योगिने समीपमागत्य परमां पूर्णां सिद्धिं स्वस्याः प्रकृतेर्यथेष्टविनियोक्तृत्वलक्षणं स्वातन्त्र्यं, तथा यदन्यत् काङ्क्षितं फलं तद् दास्यन्ति ॥ १६ ॥

अनेन सिद्धाः सेत्स्यन्ति साधयन्ति च मन्त्रिणः ॥१७॥
यत् किञ्चिद्भैरवेतन्त्रे सर्वमस्मात् प्रसिध्यति ।

अनेनै[1]वाहमिति- चिदानन्दविश्रान्तिलक्षणेन[2] समाधिना अघोरमन्त्रेण च सिद्धा योगिनो जन्ममोक्षान्यतरपरिग्रहे स्वतन्त्राः संपद्यन्ते साधयन्ति अन्यानपि सिद्धान् संपादयिष्यन्ति । तथा अस्यैव महामन्त्रोपासकस्य यत् किञ्चिद् भैरवेतन्त्रे फलमुक्तं तत् सर्वमस्मात् महामन्त्रोपासनरूपात् समाधेरघोरमन्त्रतश्च सिध्यति ॥ १७ ॥

अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ॥ १८ ॥
स सिद्धिभाग् भवेन्नित्यं स योगी सच दीक्षितः ।

यः कश्चिदिति वर्णाश्रमविभागाधिकारव्यतिरिक्तस्तत्त्वतो देहाहंभावन्यक्कारेण एवं उक्तप्रकारेण महामन्त्रं वेत्ति, सोऽदृष्टमण्डलोऽपि दीक्षाविधाने यत् प्रयुक्तं मण्डलं कलशयागादिदेवताचक्रं तत् तेनादृष्टमपि, एवमीदृशः सन्नपि सिद्धिभाक् नित्ययोगी दीक्षितश्च भवति । उक्तं च—

'स्वस्वरूपपरिज्ञानं मन्त्रोऽयं पारमार्थिकः ।

[1] 'अनेनाह' क. । [2] 'क्षणसमा०' क. पाठः ।

दीक्षेयमेष योगश्च क्रियाया अप्यनुत्तरः ॥'

इति । योगो नवनाभसंज्ञः, कलशमण्डलाग्निसाधन- चरुसाधन- शिष्यसंस्कार- न्यासविधान- पाशसूत्रसंस्कार- स्वप्नपरीक्षा- यागविधान- रुद्रांशापादन- कलापञ्चकशोधन- योजनिकोपदेशाभिषेक- पवित्रारोपण- विसर्जनान्तायाः क्रियायाः कर्मानुष्ठानादपि अनुत्तरोऽत्युत्कृष्टः ॥ १८ ॥

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः ॥ १९ ॥
शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ।
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ॥ २० ॥

अनेन[1] महामन्त्रेण भैरवेश्वरस्य सर्वाभिः शक्तिभिर्ज्ञायते स्वकीयत्वे सः, तथा योगं विनापि व्युत्थाने वर्तमानः शाकिनीकुलसामान्यः शाकिनीकुलस्य योगिनीगणस्य सामान्यः साधारणः क्रीडनको भवेत् । पूर्वमविधिज्ञोऽपि अनेनै[1]व महामन्त्रेण ज्ञातेन दीक्षाया[2] यजनं प्रति विधानज्ञो जायते ॥ २० ॥

कालाग्निमादितः कृत्वा मायान्तं ब्रह्मदेहगम् ।
शिवो विश्वाद्यनन्तान्तः परं शक्तित्रयं मतम् ॥२१॥

निवृत्तिकलायाः पादाग्राद्गुल्फान्तं व्याप्तिः, तत्रैव भूतत्त्वस्थितिः ब्रह्मणोऽधिकृतिः । प्रतिष्ठाया गुल्फान्नाभ्यन्तं व्याप्तिः, तत्र जलतत्त्वमारभ्य प्रकृतितत्त्वान्तं चतुर्विंशतितत्त्वस्थितिः तत्र विष्णोरधिकृतिः । विद्याया नाभेस्तालन्तं व्याप्तिः, तत्र पुरुषतत्त्वमारभ्य मायातत्त्वान्तं सप्ततत्त्वस्थितिः, तत्र रुद्रस्य धिकृतिः । शान्ताकलायास्तालुनो बिन्द्वन्तं व्याप्तिः तत्र शुद्धविद्यादितत्त्वत्रयस्थितिः, तत्र ईश्व-

[1] 'अनेन महा' क. पाठः । [2] 'दीक्षायज' क. ।

रस्याधिकृतः ।

पुरुषनियतिकालरागविद्याकलामायातत्त्वानि सप्त, शुद्धविद्यातत्त्वेश्वरतत्त्वसदाशिवाख्यानि त्रीणि तत्त्वानि, भूतानि पञ्च, धीन्द्रियानि पञ्च, कर्मेन्द्रियानि पञ्च, विषयाः पञ्च, अन्तःकरणानि त्रीणि, प्रकृतिरेका, निवृत्तावष्टोत्तरशतं भुवनानि, प्रतिष्ठायां षट्पञ्चाशत्, विद्यायां सप्तविंशतिः, शान्तायां सप्तदश, शान्त्यतीतायां षोडश, एवं सर्वाणि भुवनानि चतुर्विंशत्यधिकं द्विशतम् । शान्त्यतीताया बिन्दोः करन्ध्रान्तं व्याप्तिः, तत्र अनन्तव्याप्तशिवतत्त्वस्थितिः तत्र अनाश्रितशिवस्याधिकृतिः । अत्र तु सङ्क्षेपेणैव एतत्क्रमः । कालाग्निं कालाग्निस्थानं पादाग्रं आदितः कृत्वा तदारभ्य मायान्तं मायातत्त्वान्तं ब्रह्मेत्युपलक्षणं तेन ब्रह्मविष्णुदेहगमिति तालवन्तं स्थितौ, ब्रह्म इति नपुंसको निर्देश पेशः पाठः । शिवो मायोर्ध्वे विश्वाद्यनन्तान्तो विश्वभुवनाच्छुद्धविद्यादेरारभ्य अनन्तान्तो अनन्तभुवनावधि अधिष्ठाता स्थितः, अतः परं शक्तित्रयं विद्या- शान्ता- शान्त्यतीतादित्रयं सूक्ष्ममुत्कृष्टं च मतम् ॥ २१ ॥

कुत इत्याह—

तदन्तर्वर्ति यत्किञ्चित् शुद्धमार्गे व्यवस्थितम् ।
अणुर्विशुद्धमचिरादैश्वरं ज्ञानमश्नुते ॥ २२ ॥

तस्य शक्तित्रयस्य अन्तर्वर्ति यदध्वरूपं तत्त्वभुवना[1]ध्वादिमध्यस्थितं तत् शुद्धमार्गे व्यवस्थितं मायाकालुष्यानवतारात्तस्यादणुर्जीवो योगमभ्यस्यन् शुद्धाध्वनि प्रतिष्ठितोऽचिराद् ऐश्वरं ज्ञानं विशुद्धं भेदप्रथारहितं प्राप्नोति ।

[1] 'भादि' क. पाठः ।

षडध्वानः वर्णपदमन्त्रभुवनतत्त्वकलात्मानः, त्रयो वाचकास्त्रयो वाच्याः ॥ २१ ॥

तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ।
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ॥ २३ ॥

तच्चोदकः तस्य ईश्वरज्ञानस्य चोदकोऽनुग्रहभाजनं कञ्चिदेव योगिवर्यं प्रति प्रयोजकः शिवकलाधिष्ठातः ज्ञेयः, यतः स एव सर्वज्ञः । यदुक्तम्—

'एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः ।'

इति । परमेश्वरोऽदेयमपि दातुं समर्थः । सर्वगो व्यापकः । सर्वगो मायीयमलरहितः । स्वच्छः आणवमलरहितः । तृप्तः कार्ममलरहितत्वात् निराकाङ्क्षः । स्वायतनश्चिदात्मनि प्रतिष्ठितः । शुचिर्निर्वासनः । ईतादृगन्यो देवः कोऽपि नास्ति । मलत्रयलक्षणं श्रीप्रत्यभिज्ञायाम्—

'स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥
भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम् ।
कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम् ॥'

(ई० प्र० ३-२-४)

इति ॥ २३ ॥

ननु अणोर्जीवस्य सङ्कुचितस्य पूर्ण[1]व्यापकेश्वरज्ञानं दुर्घटमनुमीयते जलबिन्दोरिवार्णवत्वप्राप्तिरित्यतो दृष्टान्तनिदर्शनेन सम्यग्बोधयति—

यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरम् ॥ २४ ॥

[1] 'पूर्णेश्वर' क. पाठः ।

न्यग्रोधबीजे वटवृक्षबीजे शक्तिरूपो हृदयबीजं शुद्ध-चित्परामर्शात्मपरारूपं तत्र स्थितं चराचरात्मकं जगद्वि-स्तीर्णं हृदयबीजस्थं सूक्ष्मरूपेण स्थितमतो न किञ्चिदसम-ञ्जसम् ॥ २४ ॥

एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता ॥ २५ ॥

तत्त्वेन देहाहंभावतिरस्कारेण चिदात्मप्रतिष्ठया यो वेत्ति संवेदयते । दीक्षेति—

'ददाति ज्ञानसद्भावं क्षपयत्यखिलं मलम् ।
बोधानुवेधाद् दीक्षोक्ता दानक्षपणधर्मिणी ॥'

इत्यादिना लक्षिता मोक्षावहा, तिलाज्या[1] इति बाह्योपक-रणमनपेक्षमाणा, नात्र संशयः ॥ २५ ॥

एवमान्तरीं सूक्ष्मां पूजामभिधाय बाह्यपूजोपलक्षणमा-त्रमप्याह—

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ।
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमन्त्रिताम् ॥२६॥

ईशानमूर्ध्ने नमः, तत्पुरुषवक्त्राय नमः, अघोरहृदया-य नमः, वामदेवगुह्याय नमः, सद्योजातमूर्तये नमः, इति मन्त्रेण न्यासं कृत्वा, अघोरमन्त्रेण च सप्तविंशतिवारमष्टो-त्तरशताक्षमालापादेन मन्त्रितां शिखां बद्ध्वा ॥ २६ ॥

एकैकं तु दिशां बन्धं दशानामपि योजयेत् ।
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशान्तये ॥ २७ ॥

छोटिकाभिर्दशभिः,

'भूताः प्रेताः पिशाचाश्च राक्षसाश्च सरीसृपाः ।

---

१ 'बाह्या इति' क. पाठः ।

अपसर्पन्तु ते सर्वे दिव्या अस्त्रेण ताडिताः ॥'

इति मन्त्रेण दिग्बन्धं प्रयोजयेत्,

'अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥'

इति मन्त्रेण पूर्वं पार्ष्ण्याघातत्रयं कृत्वा,

'पाषण्डकारिणो भूता भूता भूम्यन्तरिक्षगाः ।
दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया ॥'

इति । सशब्दं तालत्रयं दत्त्वा प्रत्यूहोपशमनाय ॥ २७ ॥

शिखासंख्याभिजप्तेन तोयेनाभ्युक्षयेत्ततः ।
पुष्पादिकं क्रमात् सर्वं लिङ्गे वा स्थण्डिलेऽथवा ॥२८॥

चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ।

नैर्ऋतेऽस्त्रार्घपात्रे सप्तविंशतिवारमघोरमन्त्रेण मन्त्रितं तोयं विधाय ज्ञानखड्गेन पुष्पगन्धाक्षतादिकं पूजोपकरण-मभ्युक्षयेत् शोधनार्थं सिञ्चेत् । ततो मृन्मयादिलिङ्गे स्थ-ण्डिले वा यागभूमौ विहिताष्टदलकमलादिके वा दर्पणप्र-तिबिम्बिते चतुर्दशवारमघोराभिजप्तेन पुष्पेण इति पुष्पा-सनादिकां पूजां कुर्यात् ॥ २८ ॥

ततः सृष्टिं यजेद्वीरः पुनरेवासनं ततः ॥ २९ ॥
सृष्टिं तु संपुटीकृत्य पुनर्यजनमारभेत् ।

ततो बाह्यपूजानन्तरमकारादिहकारान्तां वर्णसृष्टिं य-जेत् लिङ्गादौ च पूजयेत् 'अं नमः' इत्येवम्, पुनरेवं वीरो योगीन्द्रो ध्यानयोगासनं विधाय अकारादिहका-रान्तां सृष्टिं संपुटीकृत्य प्रत्याहृत्य अहमिति चित्तत्त्वे प्र-तिष्ठितो भूत्वा पुनर्यजनमान्तरीं पूजामारभेत् । आत्माम-र्शनमेवाभ्यन्तरी पूजा ॥ २९ ॥

ततो भावनया पूजा—

सर्वतत्त्वसुसंपूर्णां सर्वाभरणभूषिताम् ॥ ३० ॥

यजेद्देवीं महेशानीं सप्तविंशतिमन्त्रिताम् ।

ततः सुगन्धिपुष्पैस्तु यथाशक्त्या समर्चयेत् ॥ ३१ ॥

पूजयेत् परया भक्त्या आत्मानं च निवेदयेत् ।

सर्वतत्त्वैः षट्त्रिंशत् तत्त्वैः सुसंपूर्णां निर्भरां सर्वाभरणभूषितां महेश्वरीं परां देवीमघोरमन्त्रेण परया भक्त्या अत्यादरेण पूजयेत् गन्धपुष्पादिभिरात्मानं च निवेदयेत् समर्पयेत् ॥ ३१ ॥

एवं यजनमाख्यातमग्निकार्येऽप्ययं विधिः ॥ ३२ ॥

कृतपूजाविधिः सम्यक् स्मरन् बीजं प्रसिध्यति ।

एवं द्विप्रकारं यजनं पूजनमुक्तं अग्निकार्ये होमादावपि अयं विधिः, एष एव प्रकारो द्विविधः एवमुक्तविधया कृतपूजाविधिर्योगी सम्यग् देहाहन्तां विस्मार्य जगतो वर्णानां च बीजं मूलकारणं चित्तत्त्वं नित्यमनवरतं व्युत्थानेऽपि स्मरन् प्रत्यवमृशन् प्रसिध्यति अनुत्तरां ज्ञानधारामधिरोहति ॥ ३२ ॥

अथ ध्यानयोगनिष्ठस्य योगिनः सप्रकारं स्मरणे रहस्योपदेशमाह—

आद्यन्तरहितं बीजं विकसत्तिथिमध्यगम् ॥ ३३ ॥

हृत्पद्मान्तर्गतं ध्यायेत् सोमांशं नित्यमभ्यसेत् ।

जगतो वर्णानां [1]वा बीजं परारूपं चिदात्मकं तत्त्वं,

'बीजं मां सर्वभूतानां........................ ।'

1 'च' क. पाठः ।

इति गीतासूक्तम् । विकसदिति विकसन्तो अकारादि[...] कारान्तं प्रसरन्तो

'अमूला तत् क्रमात् ज्ञेया .... ।' (८ श्लो०)

इत्यत्र ज्ञातमात्रेण[1] व्यञ्जनरूपेण परिणमन्तो वैखर्यां व[...] स्पष्टतां गच्छतश्च ते तिथयः पञ्चदश स्वरास्तेषां मध्[...] तदन्तर्वर्ति अहमित्येवं स्वाभेदेन ननु ध्येयत्वेन हृत्प[...]न्तर्गतं ध्यायेत् राजयोगवित् गुरूपदेशेन अनुशीलयेत्

'गुरुरुपायः ।' (शि० सू० २ । ६ ।

इत्युक्तम् । तथाच श्रुतिः—

'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रो[...]यं ब्रह्मनिष्ठम् ॥'

इति । कथं ध्यायेदित्याह- आद्यन्तरहितं आदिहान्त[...] रहितं वर्णानां विकल्परूपत्वात् । स्पन्देऽपि—

'शब्दराशिसमुत्थस्य..................... ।' (स्प० का० ४८

इत्युक्तम् । अविकल्पं यथा स्यात्तथा ध्यायेत्

'केवलं बुद्ध्युपादानक्रमरूपानुपातिनी ।

प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते ॥'

इत्येवंलक्षणां मध्यमां वाचं प्रतिनिवर्त्य सत्त्वेन विमृ[...]

यदुक्तं श्रीपूर्वे—

'तदेतदहमित्येव विसर्गानुत्तरात्मकम् ।

नाभिकुण्डलहृद्व्योम्नो योगिनोऽहमुपासते ॥'

इति । निर्विकल्पध्यानस्य एतदेव लक्षणम् । ध्यान[...] बलेन षट्चक्रभेदनपूर्वं सुषुम्नायां प्राणापानलयेन पाद[...] दारभ्य ब्रह्मरन्ध्रान्तं विद्युद्वत् सहसोत्थिते चिदानन्दपूरे [...] निमज्जनं तदेव ध्यानं अन्यथा दम्भचर्येति । अत्र व्यु[...]

1 'व्याख्यातमात्रेण' क. पाठः ।

स्मरणोपयोगिनीं युक्तिमाह— सोमांशमिति, सोमांशं प्राणस्य अवसाने अपानस्य प्रविविक्तायां नित्यं अनवरतं अभ्यस्येत् चित्तत्त्वं विमृशेत् ।

'न सा जीवकला काचित् सन्तानद्वयवर्तिनी ।
व्यात्री शिवकला यस्यामधिष्ठात्री न विद्यते ॥'

इत्युक्तेः । तदुक्तं वासिष्ठे—

'अस्तङ्गतवति प्राणे त्वपानेऽभ्युदयोन्मुखे ।
बहिः कुम्भकमालंब्य चिरं भूयो न शोच्यते ॥' (वा०६प्र०)

तथा—

'प्राणक्षय[1]पदान्तस्थमपानक्षयकोटिगम् ।
अपानप्राणयोर्मध्यं[2] चिदात्मानमुपास्महे ॥'

इति । तन्त्रालोकेऽपि—

'तपः प्रभृतयो येच नियमस्तत्तदासनम् ।
प्राणायामाश्च तत्सर्वमेतद् बाह्यवि[3]जृम्भितम् ॥
श्रीमद्वीरावलौ प्रोक्तं बोधमात्रे शिवात्मके ।
चित्तप्रलयबन्धेन प्रलीने शशिभास्करे ॥
प्राप्ते च द्वादशे भागे जीवादित्ये सुबोधके ।
मोक्षः स एव कथितः प्राणायामो निरर्थकः ॥
प्राणायामो न कर्तव्यः शरीरं येन पीड्यते ।' (तं० ४ आ०)

इति । प्रभृतिग्रहणेन तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः । 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्य' इत्यादयो योगशास्त्रोक्ताः इति ॥३३॥

यान्यान् कामयते कामांस्तांस्तान् शीघ्रमवाप्नुयात् ।३४।
अस्मात् प्रत्यक्षतामेति सर्वज्ञत्वं न संशयः ।

---

१ 'क्षये पदा' क. । २ 'मध्ये' क. । ३ 'विलग्वि' क. पाठः ।

कामानभिलाषान् [1]'अस्मादेव परतत्त्वाभ्यासात् प्रत्यक्षतामेति प्रादुर्भवति ॥ ३४ ॥

एवं मन्त्रफलावाप्तिरित्येतद्रुद्रयामलम् ॥३५॥
एतदभ्यासतः सिद्धिः सर्वज्ञत्वमवाप्यते ।

एवं द्विप्रकारपूजनेन, रुद्रश्च रुद्राणी च रुद्रौ तयोः शिवशक्त्योर्यामलमुभयसंघट्टात्मकं रूपम् । सिद्धिर्बाह्याभ्यन्तरी च । तदुक्तम्—

'धर्माधर्मान्तरे चित्तं रुद्धं येन तदा तु सः ।
यद्वक्ति स भवेन्मन्त्रः किं पुनर्मान्त्रिकोत्थितः ॥'

इति । तथाच श्रुतिः—

'या वागुदिता या चानुदिता शिवा न शन्तमा भव ।
सुमृळीका सरस्वति मा ते व्योम सन्दृशे ॥'

हे सरस्वति परब्रह्मणोऽविनाभाविनि परामर्शात्मिकशक्ते या त्वं वाग्रूपा चित्परामर्शात्मिका उदिता वैखर्यात्मना आविर्भूता. या च त्वमनुदिता मध्यमारूपेण सती परैरसंवेद्या, या च त्वं शिवा चिदात्मपरामर्शपरतया दुःखसंपर्कशून्या पश्यन्ती रूपा, या च त्वं शन्तमा चिदानन्दघनत्वेन परारूपा, सा त्वं नोऽस्माकं सुमृळीका विभावितालौकिकचिदानन्दा भव इत्याशंसा । तथा ते तव स्वरूपस्य व्योम चिदात्मपरामर्शविस्मरणलक्षणं छिद्रं चतुर्ष्वपि वाक्षु मा संदृशे माद्राक्षम् । त्वत्स्वरूपसाक्षात्कारान्नित्यमप्रच्युतो भूयासमित्याशास्महे ॥ ३५ ॥

एकं यः स्वमुखं पिधाय जगतां सृष्टिं विधत्ते स्वयं
यश्चाच्छाद्य निजान्चतुर्दशभुजान्रक्षाविधाने पटुः ।

---

१ 'अपरस्मात्' क. पाठः ।

स्वानि द्वादशलोचनानि च तिरोधाय छिणोति चणा-
यस्तं कारणकारणं हितरतं स्वच्छन्दनाथं स्तुमः ॥

दृष्ट्वा दुर्घटनां शास्त्रे गुप्तपादैर्विनिर्मिते ।
राजानलसकेनैषा त्रीशिकाविवृतिः कृता ॥

इति शम् ॥

इति श्रीराजानकलक्ष्मीरामकृता परात्रीशिकालघुविवृतिः समाप्ता ॥

पाठकलेखकयोः श्रेयस्करी भूयादिति ॥

SV
S.N
Subj
Sub.